RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23

॥ ओ३म् ॥

सत्याऽनृता च परुषा
प्रियवादिनी च
हिंस्रा दयालुरपि
चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा
च वेश्यागनेव
नृपनीतिरनेकरूपा ॥४७॥

(नीतिशतकम्)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

आशा कीर्तिः
पालनं ब्राह्मणानां
दानं भोगो
मित्रसंरक्षणं च।
येपामते पडणा
न प्रवृत्ताः
कोऽर्थस्तेपां
पार्थिवीपाश्रयेण ॥४८॥

(नीतिशतकम्)

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

卐 वर्षम्-११ 卐 अंकः-०२ (२४२) 卐 १६ जुलाईमासः २०२१तः ३१ जुलाईमासः २०२१ पर्यन्तम् 卐 विक्रमसंवत्-२०७८ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२१ 卐 पृष्ठम्-८

## ‘जातीय-अस्मितायाः प्रश्नं, जयशङ्करप्रसाद’ इतिपुस्तकं आश्रित्य संगोष्ठी समायोजिता

30/6/2021 दिनाङ्के संपन्नायाम् अस्यां संगोष्ठ्यां प्रो. सदानंद शाही, प्रो. रोहिणी अग्रवालश्च अस्य पुस्तकस्य समयस्य अस्मितायाश्च प्रश्नाय महत्वं दत्तवन्तौ। साहीवर्यस्य अनुसारम् एतत् पुस्तकं प्रसादं नूतनतया पठितुं तन्महत्वं च विचारयितुं प्रेरणां ददाति । रोहिण्या उक्तं यत् ग्रन्थकर्त्ता प्रसादेन सह संवादः कृतः । सामंजस्यं च निर्व्यूढम्। एष: हि गांधिनः मुक्तिबोधस्य, प्रसादस्य नंददुलारे वाजपेईवर्यस्य च अवधारणानां समीक्षणं अस्ति यद् आलोचनावास्तविकमूल्यानां



बोधं कारयति । अद्य अस्मिताप्रश्नः येन प्रकारेण ज्ञातुं प्रयासः विधीयते: एतत् पुस्तकं तस्य प्रतिपक्षं भूत्वा अस्मान् उपनिषदः प्रति नयति। पश्चिमकविभिरपि क्वचित्प्रेरणा उपनिषद्भ्यः स्वीकृता। रोहिणी पुस्तकमहत्वं स्वीकृत्य भाषते स्म यत् भारतस्य अस्मिताम् उद्दिश्य चतुरसेन शास्त्रिणः ‘वयं रक्षामः,’ अनंतमूर्तेः संस्कारः ‘भालचंद्र नेमाड़ेवर्यस्य ‘हिंदू’ इत्यस्य च पुस्तकस्य अनन्तरम् एतत् पुस्तकं चतुर्थं वर्तते यस्य पृष्ठभूमौ जयशंकरप्रसादसदृशः दार्शनिकः, चिंतकः कविश्च वर्तते।

स्वीये अध्यक्षीयवक्तव्ये प्रो. राधावल्लभ त्रिपाठी अकथयत् यत् संगोष्ठी स्वयमेव अभूतपूर्वा। विजयबहादुरस्य एतत् पुस्तकं साहित्यजगतः एका महती उपलब्धिः। सोपि अस्याः पुस्तकरचनाप्रक्रियायाः साक्षीभूतः। एतत् तस्य साहित्यस्य साधनायाश्च प्रतिफलम्। तेनोक्तम् आचार्यः नंददुलारे वाजपेईद्वारा यावत् प्रसादविषये लिखितं तद्धि स्वसमयस्य महत्वपूर्णकार्य

शेषभागः द्वितीयेपुटे

## पाण्डुलिपि-संरक्षण-प्रशिक्षण कार्यशाला समायोजिता

“इन्फ्रेंसिज फाउण्डेशन” इत्यस्य आर्थिकसहयोगेन -संस्कृतसंवर्धनप्रतिष्ठानस्य तत्वावधने सम्पूर्णानन्दविश्वविद्यालयस्य सरस्वतीभवन- पुस्तकालये समायोजिता पञ्चदिवसीय कार्याशालायाः




उद्घाटनं जातम्। कार्यक्रमे विशिष्टातिथिः श्रीमती मोनिका गर्ग IAS जूम एप द्वारा, सम्पूर्णानन्दविश्वविद्यालयस्य कुलपतिमाननीयः अध्यक्षः प्रो० हरेरामत्रिपाठी, संयोजकः प्रो० अमितकुमार शुक्ल संस्कृतसम्वर्धनप्रतिष्ठानस्य निदेशकमहोदयः चाँदकीरणसलूजावर्यः,लक्ष्मीनरसिम्भवर्यः इन्दिरागांधीकलाकेन्द्र देहलीतः पाण्डुलीपी संरक्षणं प्रशिक्षणार्थं अनीलद्वैवेदी, नितिनकुमारः,जीतेन्द्रचोहानश्च उपस्थिताः आसन्। वैदिकमङ्लाचरनात् कार्यशालायाः कार्यक्रमस्य उद्घाटनमभूत्। उद्घाटने कुलपतिमहोदयेन उक्तं यत् पाण्डुलिपीनां संरक्षणमत्यन्तावस्यकमासीत् किन्तु एतत् कार्यं कस्यचिदपि हस्ते ग्रहीतुं न शक्तवान्। प्रतिष्ठानस्य

शेषभागः द्वितीयेपुटे

## योगसाधना जीवनस्य सर्वविध-सम्पूर्णतायाः आधारः

-प्रो. रणजित् बेहेरा

नवदेहली। योग-विज्ञान-विभागः, कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयः तथा बृहत्तर-वैदिक-अध्ययन-परिषद्(WAVES)इत्यनयोः संस्थानयोः संयुक्ततत्त्वावधानेनअष्ट-दिवसीया योग-प्रशिक्षण-कार्यशाला ५.६.२०२१ तः १२.६.२०२१ यावत्प्रातः काले सार्धसप्तवादनतः सार्धाष्टवादनं यावत् जूम-माध्यमेन साफल्येन समायोजिता।

जूनमासस्य पञ्चमदिनांके प्रातः सार्द्धसप्तवादने मंगलाचरणेनैव कार्यशालेयं समारब्धा। योगविज्ञानविभागाध्यक्षा प्रो. कलापिनी अगस्तिमहोदया कार्यशालायाः प्रास्ताविकं प्रास्तौत। पुनश्च तया निगदितं यत् कोविड-१९ इत्येतदालक्ष्य योगविज्ञानविभागेन आवर्षं बहव्यः कार्यशालाः समायोजिताः येन सहस्राधिकजनाः लाभान्विताः सञ्जाताः। सामान्यजनानां कृतेऽपि योगकार्यशालाः नैरन्तर्येण समायोज्यन्ते। उद्घाटनसत्रेऽस्मिन् वेव्स-महासचिवेन प्रो. रणजित् बेहेरावर्येण समेषामतिथीनां प्रतिभागीनाञ्च स्वागतं



विहितम्। तेनैव सहर्षं सूचितं यत् त्रयोदशप्रदेशेभ्यः शताधिक-योगसाधनाव्रतिनः भागं गृह्णन्ति। उद्घाटनसत्राध्यक्षया प्रो. शशितिवारीमहोदयया भणितं यत् योगः ज्ञानं, विज्ञानं, दर्शनं, जीवनदर्शनं, प्राचीनमर्वाचीनञ्चापि दर्शनं वर्तते।प्राचीनकालादिदानीं यावदेव योगगुरवो वन्दनीयाः। योगमाध्यमेन शारीरिक-मानसिक-बौद्धिक-विकाससमवाप्स्यामो वयम्। कार्यशालायामस्यां योगविज्ञानविभागस्य सहायकाचार्यः श्रीयुतः मिथिलेशभाकरेमहोदयः, शोधच्छात्रा सुश्री रश्मीजैनमहोदया च योगप्रशिक्षकौ आस्ताम्। योगविज्ञानविभागस्य सहायकाचार्येण मिथिलेशभाकरेवर्येण उद्घाटनसत्रमिदं साफल्येन सञ्चालितम्।

तदनु सुश्री रश्मीमहोदया कार्यशालायाः प्रारम्भिकेषु चतुर्षु दिवसेषु प्रार्थना- ओंकारोच्चारणाभ्यास- सूक्ष्मव्यायाम-ऊर्ध्वहस्तासन-सेतुबन्धसर्वांगासन-उत्थितत्रिकोणासन- सुप्तपादांगुष्ठासन- ताडासनादीनां विविधानामासनानामभ्यासं सम्यक्तया कारितवती। कार्यशालायाः द्वितीयदिवसे वरिष्ठजनानुद्दिश्य आसन्दयोगस्याभ्यासः कारितः। प्रतिसत्रान्ते योगप्रशिक्षिकया रश्मीमहोदयया प्रतिभागिभिः पृष्टानां प्रश्नानामुत्तरं प्रदत्तम्। अन्तिमेषु चतुर्षु दिवसेषु श्रीयुतः मिथिलेशभाकरेवर्यः प्रमुखतया कोविडविषाणुग्रस्तजनानालक्ष्य

शेषभागः तृतीयेपुटे

## महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयस्य संस्थापकस्य कुलपतेः श्रेयांश द्विवेदिनः त्यागपत्रेण संस्कृतजगत् स्तब्धम्



कैथलम् – हरियाणाराज्यस्य एकमात्रसंस्कृतविश्वविद्यालये महर्षि बाल्मीकिसंस्कृतविश्वविद्यालयस्य संस्थापकः कुलपतिः डॉ श्रेयांश द्विवेदी स्वीयकार्यकालतः पूर्वं त्यागपत्रम् अदात् येन संस्कृतजगत् असंतोषः प्रकटितःस सूत्राणाम् अनुसारं डॉ. दिवेदी अनर्गलानाम् आरोपाणां राजनीतिकद्वेषस्य च परिणामस्वरूपेण त्यागपत्रम् अदात्। स वर्तमाने राज्यपालद्वारा कुलपतिपदस्य दायित्वं चौधरीबंसीलालविश्वविद्यालयस्य (भिवानी) कुलपतये प्रो. राजकुमार मित्तलाय समर्पितम्। डॉ.श्रेयांश द्विवेदी एकस्मिन् वार्तालापे अवोचत् यत् मम जीवनं संस्कृताय समर्पितम्। तेन स्वनिष्ठया कुलपतिदायित्व निर्व्यूणम्। तेन स्वीयकार्यकाले विश्वविद्यालयस्य महत्वपूर्णाः उपलब्धयः सविस्तरं चर्चिताः।

## डाक्टरशुक्लाय ‘वाल्मीकि-पुरस्कारः’



महामहोपाध्याय विश्रुतसंस्कृतकवये डाक्टर रमाकान्तशुक्लाय उत्तरप्रदेशसंस्कृतसंस्थानेन २०१८तमवर्षीयो ‘वाल्मीकि-पुरस्कारः’ समर्पितः। पुरस्कारे ऊर्णावस्त्रं, ताम्रपत्रोत्कीर्णं सम्मानपत्रं लक्षद्वयरूप्यकात्को राशिश्च संस्थानेन डाक्टरशुक्लाय समुपाहियन्त।

१२.७.२०२१तमे दिनाङ्के डाकद्वारा पुरस्कारमुपलभ्य डाक्टर शुक्लेन फेसबुकमाध्यमेन संस्थानाय धन्यवदो ज्ञापितः। संवादमिममुपलभ्य पञ्चशताधिकैः सुहृद्भिराचार्यशुक्लो वर्धापितः।

## सांस्कृतिकन्यासम् आन्वेष्टुं लग्नं ततारपुरगुरुकुलम्

हापुड- ततारपुरस्थितगुरुकुलमहाविद्यालयः ने जिल्लायाः धार्मिकम् ऐतिहासिकं च न्यासं संरक्षितुं नूतनं प्रकल्पम् आरब्धवान। तत्समनन्तरमेव गुरुकुलपरतया एका पत्रिका प्रकाशयिष्यते यन्माध्यमेन



समाजः न्यासं प्रति जागरूकः करिष्यते। पत्रिकायै प्रदेशस्य राज्यपालेन मुख्यमंत्रिणा च संदेशः लिखितः । तत्र चोरीचाराघटनाया उल्लेखः विहितः, पत्रिकायाः नाम हरिपुरसम्पदा भविष्यति।

ततारपुरस्थितगुरुकुलमहाविद्यालयस्य आचार्यः कुशलदेवः अवोचत् यत् हापुड स्वयमेव ऐतिहासिकं नगरम् यत् प्राचीनकाले हरिपुरनाम्ना ज्ञायते स्म। ततः अपभ्रंशीभूय हड+पुड इति जातम् । गंगायाः धार्मिकमान्यतया सह तत्र अमरहुतात्मनां अनगिनतगाथाः सन्ति। महाविद्यालयस्य शिक्षकाणां छात्राणां च पत्रिकां हरिपुरसम्पदां प्रकाशयितुं प्रशंस्या इयं योजना वर्तते।

प्रथमपुटस्य शेषभागः

## पाण्डुलिपि-संरक्षण-प्रशिक्षण कार्यशाला.....

निदेशकवर्यस्य धन्यावादं ज्ञापयन् पाण्डुलिपीनाम् संरक्षण कार्यं सफलतापूर्वं सिद्धिं प्रति गच्छेत्। संस्कृतसम्वर्धनप्रतिष्ठानस्य निदेशकवर्येण उक्तं यत् पाण्डुलिपयः न केवलं पुस्तकानि एतास्तु महताम् ऋषीणां तपःफलं किञ्चित् मात्रेण अस्माकं पुरतः संगृहीताः सन्ति। एतासाम् नवीनीकरणं रक्षणञ्च तथैव करणीयं यथा वयमस्माकं शरीरस्य कुर्मः। कार्यशालायाः समापनं 03/07/2021 सायकाले त्रिवादने अभूत्। समापनकार्यक्रमे प्रतिष्ठानस्य निदेशकवर्यः जूमएपमाध्यमेन समाहिताः आसन्। समापनकर्यक्रमे इन्दिरागांधि कलाकेन्द्रदेहलीतः प्रशिक्षकेण अनीलद्वैवेदीमहोदयेन बोधितं यत् पञ्चदिवसेषु कथं पाण्डुलिपिषु कथं नवीनीकरणस्य कार्यम् एवञ्च कीटनाशकपदार्थस्य प्रयोगः उचितप्रकारेण करणीयम्।

लक्ष्मीनरसिम्भवर्यैः सर्वेषां धन्यवादः ज्ञापितः। कार्यकर्त्रीषु संस्कृतसम्वर्धनप्रतिष्ठास्य शोधकार्यकर्ता बव-वतकपदंजवत संदीपः,कार्यालयकार्यकर्तृषु जीतेन्द्रः,आशीषः। रिषु,गौरवः,अमितः, प्रीतमः,राहुलः, सम्पूर्णानन्द विश्वविद्यालयस्य सरस्वतीभवनपुस्तकालयस्य च पदाधिकारिणः समुपस्थिताः आसन्।

प्रथमपुटस्य शेषभागः **'जातीय-अस्मितायाः प्रश्नं,....**

वर्तते। परंतु तत्पश्चात् एतत् पुस्तकं प्रसादं प्रति महत्तमकार्यम् अस्ति। वस्तुतः प्रसादः एकः विराड्प्रतिभायाः कविः वर्तते। विजय बहादुरस्य प्रयासेन प्रसादः एकविंशशताब्देः साहित्यविमर्शकेंद्रे आगतः। एतस्मिन् पुस्तके प्रसादस्य बहुतरविशेषताः प्रथमबारम् उज्जागरिताः। यथा प्रसादगान्धिनोः वैचारिकनिकटता। प्रो. त्रिपाठी अवोचत् अस्मात् पुस्तकात् प्रसादस्य कासुचिद्विशेषतासु पाठकानां ध्यानं गच्छेत् । याश्च न सम्यक्तया अवगता। तेनोक्तं प्रसादस्य एका दुर्लभविशेषता यत् अभिनवगुप्तस्य शैवदर्शनस्य समकालीनसांस्कृतिकपरिपेक्ष्ये स्वीकार्यव्याख्या वर्तते। प्रसादः अभिनवगुप्तस्य काव्यदर्शन् विस्तारयितवान्। अंते तेन संगोष्ठ्याः आयोजकेभ्यः सर्वेभ्यः वक्तृभ्यः हार्दिकः धन्यवादः प्रदत्तः।




## डा. वाचस्पतिमिश्रस्य प्रयासेन प्रथमकक्षातः पाठयिष्यते संस्कृतम्

लखनऊ। तत्र उत्तरप्रदेशमाध्यमिकसंस्कृतशिक्षा परिषदः (लखनऊ)उपवेशने उत्तरप्रदेशसंस्कृतसंस्थानस्य (लखनऊ) अध्यक्षः डॉ वाचस्पति मिश्रः , माध्यमिकसंस्कृतशिक्षायाः सचिवः राधाकृष्ण तिवारी, डा० विनोद कुमार मिश्रः, डा० हरिद्वार शुक्लः , डा०अरविंद तिवारी च उपस्थाय प्रथमकक्षातः संस्कृतम् पाठयितुं संगोष्ठ्यां सम्मिलिताः तत्र बेसिकशिक्षापरिषदः विद्यालयेषु अधुना प्रथमकक्षातः पाठयिष्यते संस्कृतम्। तत्रैव चतुर्थीतः ,पञ्चमीतश्च वैदिकगणितस्य अध्ययनं कारयिष्यते । देशस्य राजनीतिकमानचित्रे जातेन परिवर्तनेन



जम्मू-कश्मीरतः अनुच्छेद 370 35ए च अपसारिते सति आपन्नस्थितेः विषये ज्ञापयिष्यते। अपि च बालेभ्यः गुरुगोविंदसिंहस्य पुत्राणां बलिदानमपि पाठयिष्यते। बेसिकशिक्षाविभागः शैक्षिकसत्रस्य (2021-22 )पाठ्यक्रमे सत्तारूढदलस्य सांस्कृतिकराष्ट्रवादशुभारम्भस्य उद्देश्यसम्बद्धतथ्यानि सम्मिलितानि।

षष्ठीकक्षातः पुस्तके श्पृथ्वी और हमारा जीवने देशस्य मानचित्रद्वारा पाठयिष्यते ।येन अनुच्छेदेन ( 370 व 35ए) जम्मू-कश्मीराभ्यां विशेषस्वायत्तता प्राप्ता आसीत्तयोः नागरिकेभ्यः विशेषाधिकारः प्राप्तः आसीत। तन्निवारिते सति लद्दाखः जम्मू-कश्मीरौ च केंद्रशासितप्रदेशाः जाताः । पाठ्यक्रमे अधुना परिषदीयविद्यालयेषु चतुर्थीपञ्चमीकक्षयोः वैदिके गणिते योजनम् ,अपसारणं च अध्यापयिष्यते। जगन्नाथपुरीशंकराचार्यः स्वामी भारती कृष्ण तीर्थः वैदिकगणितम् आन्विष्य षोडशमूलसूत्राणि त्रयोदश उपसूत्राणि अदात। वैदिकगणितं तार्किकतायाः सृजनात्मकतायाश्च समानरूपेण विकासं करोति।अष्टम्यां गुरु गोविंद सिंहेन सह मुगलशासकस्य औरंगजेबस्य संघर्षे अमरहुतात्मनां चतुर्णां पुत्राणां बलिदानमपि पाठयिष्यते। तत्र प्रथमः अजीत सिंहः सप्तदशवर्षाणाम् आयुषि द्वितीयः जुझार सिंहः 14 वर्षे, तृतीयः जोरावर सिंहः सप्तमवर्षे सर्वतः लघुः फतेह सिंहः षड्वर्षीयः बलिदानत्वम् अगुस्तावदेतेषां गाथा तत्र पाठयिष्यते।

## देवसायुज्यमसंस्कृतप्रतिष्ठानद्वारा संस्कृते शतमङ्कान् प्राप्तवद्भ्यः छात्रेभ्यः सम्मानं दत्तम्

देवसायुज्यमसंस्कृतप्रतिष्ठानद्वारा गुजरातराज्यशिक्षापरिषदा च आयोजितपरीक्षायां संस्कृतविषये छात्रान् सम्मानितुम् आयोजिते कार्यक्रमे संस्थाध्यक्षः डॉ. प्रफुल पुरोहितः स्वागतीकुर्वन्नभाषत यत् संस्कृतभाषा भारतदेशस्य आत्मा वर्तते। कार्यक्रमस्य अध्यक्षः शैलेषभाई मेहता छात्रान् सम्मानयन्नुक्तवान् यत् संस्कृतं रक्ष्यते चेदेव संस्कृतिः हिन्दुत्वं च रक्षिष्यते। संस्कृतछात्रासु हार्दी शाहः (उत्कर्षविद्यालयः), देवांगी श्रोत्रीयः (नूतनविद्यालयः), नीरजा शेलतः (जयअंबेविद्यालयः) चेत्यादिभिः सहिताः संस्कृतशिक्षकाः अपि सम्मानिताः। समारोहे शंकरलाल त्रिवेदी (शिक्षाविद्, अध्यक्षः, बालगोकुलम्) प्रोक्तवान् यत् संस्कृत भाषायाः



यावान् प्रचारः प्रसारश्च कर्तुं शक्यः तावन्न्यूनमेव। विशेषातिथिरूपेण उपस्थितः प्रतापराव भोइटे सम्मानितछात्रेभ्यः आशीर्वादमदात् । समारोहे अभिभावकाः, शिक्षकाः, संस्कृतानुरागिणश्च उपस्थिताः।

## उत्तरप्रदेशसर्वकारः दशलक्षाधिकानाम् आशाकार्यकर्त्रीणां माध्यमेन प्राप्स्यति वरिष्ठनागरिकान् यावत्

लखनऊ। वृद्धानां सम्यक् स्वास्थ्याय प्रदेशसर्वकारेण व्यापकप्रक्रमः आरब्धः। विशिष्टतः कर्करोगसदृशगभीररोगैः अस्वस्थानाम् अपोहनं कुर्वतां वृद्धानां सेवायाम् अधुना आशाकार्यकर्त्र्यः नियोक्ष्यन्ते । सम्पूर्णप्रदेशे आशाकार्यकर्त्र्यः एभिः रोगैः अस्वस्थानां वृद्धानां सूचीं



करिष्यन्ति अपि च अनेन सह संवादं संस्थाप्य प्रतिदिनं स्वास्थ्यस्य स्थितिं च ज्ञास्यन्ति। साकमेव औषधस्य परीक्षणे अपि एतेषां वृद्धानां सहायता करिष्यते। मुख्यमन्त्रिणा एकस्मिन् उच्चस्तरीयोपवेशने एषः निर्देशः दत्तः।

मुख्यमन्त्रिणा योगिना आदित्यनाथेन प्रदेशस्य वरिष्ठेभ्यः नागरिकेभ्यः स्वास्थ्यसेवाम् इतोऽपि उत्तमां कर्तुं निर्देशः दत्तः। चिकित्सास्वास्थ्यविभागाय वरिष्ठनागरिकाणां सूचीं निर्मातुम् उक्तम् । अस्याम् आवश्यकतायां सत्यां प्रत्येकं सहायतां प्रापयितुं सरलता भविष्यति । अस्मिन् कार्ये आशाकार्यकर्त्र्यः मुख्यभूमिकायां भविष्यन्ति। अधुना पर्यन्तं प्रदेशस्य एकसप्तत्यधिकदशलक्षाधिक आशाकार्यकर्तृभिः ग्रामीणनगरीयक्षेत्रेषु च महिलाभ्यः बालेभ्यश्च स्वास्थ्यसम्बद्धसेवा उपलब्धुं सहायतां कुर्वन्ति । अधुना आशाकार्यकर्त्र्यः प्रदेशस्य वरिष्ठनागरिकानां स्वास्थ्यस्य ध्यानम् अपि स्थापयिष्यन्ति । आशाकार्यकर्त्र्यः स्वकीयक्षेत्रे वरिष्ठनागरिकानां सूचीं सज्जीकुर्वन्ति । विशेषतः कर्कवृक्करोगेषु पीडितेषु वृद्धेषु एतेषाम विशेषावधानं भविष्यति । एतस्मात् अनन्तरम् आशाकार्यकर्तृभिः प्रतिदिनम् एतैः संवादं स्थापयिष्यन्ते अपि च स्वास्थ्यस्य स्थितिं ज्ञास्यन्ति । वरिष्ठनागरिकेभ्यः औषधेषु परीक्षणे च सहयोगं करिष्यन्ति

एककॉलद्वारा प्राप्स्यते रोगिवाहनसेवा, औषधञ्च।

चिकित्सास्वास्थ्यविभागः वरिष्ठनागरिकाणां स्वास्थ्याय प्रारब्धं विशेषसहायतासूत्रं 14567 प्रभावि निर्माति। येन स्वास्थ्यसम्बद्धसमस्यायां सत्यां वृद्धेभ्यः शीघ्रं सहायता प्राप्येत। तद्व्यतिरिक्तं सहायकसंख्याविषये सूचना अधिकाधिकजनपर्यन्तं प्रापयितुं महज्जनजागरूकताभियानम् अपि प्रारब्धम्। येन अधिकजनेभ्यः अस्याः सेवायाः लाभः प्राप्येत । सहायकसूत्रद्वारा विशेषपरिस्थितिषु वृद्धेभ्यः एकवारं कॉलद्वारा रोगिवाहनसेवा ,औषधं चापि प्रापयितुं कार्यं करिष्यति विभागः अयम्। चिकित्सा-स्वास्थ्यविभागः अग्रिमेषु अष्टसु दशसु वा मासेषु एतदुद्दिश्य स्वीयां कार्ययोजनां सज्जीकरिष्यति।

एकाकिवासं कुर्वद्भ्यः वृद्धेभ्यः योजना इदं वरदानरूपम्।

एकाकिवसिभ्यः वृद्धेभ्यः योजना भविष्यति वरम्

प्रदेशसर्वकारः एकाकिवासं कुर्वद्भ्यः वृद्धेभ्यः सुस्वास्थ्यायसौविध्याय विशेषयोजनां सज्जीकरोति। एतस्याः योजनायाः अन्तर्गतम् एतादृशवृद्धानाम् उपचाराय एकः जनः नियोक्ष्यते यः एकाकिवासं कुर्वतां वृद्धानाम् अपेक्षानुरूपम् औषधं प्रापयितुं ,परीक्षणाय च चिकित्सालयं नेष्यति। चिकित्सा-स्वास्थ्यविभागः अग्रिमेषु अष्टसु दशसु वा मासेषु एतदुद्दिश्य स्वीयकार्ययोजनां सज्जीकरिष्यति।

# संस्कृतभाषया एव सामाजिकसमसरता स्रष्टुं शक्या

वार्ताहरः - आचार्यः विजय भारद्वाजः

श्रीथानेश्वरशिवसंस्कृतमाध्यमिकविद्यालयतः कृताध्ययनौ आचार्यौ विजय भारद्वाजः, अनिरुद्धशर्मा च विद्यालयस्य प्रधानाचार्यस्य श्रीमतः मग्नानन्दचमोलावर्यस्य ।

वरिष्ठाचार्यस्य श्रीमतः कृष्णगोपाल शर्मणश्च प्रेरणया श्रीमान् मग्नानन्दचमोला अवचोत् यत् सनातनधर्मस्य रक्षणं संस्कृतभाषया सम्बद्धं वर्तते अतः एतादृशं गुरुकुलं तत्र नूनमेव अपेक्षितम्, आचार्ययोः अनयोः उत्साहं वीक्ष्य नूनमेव भावयामि यत् नूनमेव एतयोः उद्देश्यानि भगवान् पूर्णानि विधास्यति। संस्कृतेन एव सामाजिकसमरसता स्रष्टुं शक्या। संयोजकः मान्यः



श्रीरामजानकीसेवासमितिद्वारा संस्कृतगुरुकुलस्य गोशालायाः भगवतः श्रीराममन्दिरस्य च भव्यनिर्माणकार्यं रतनपुरीग्रामे खतौली, मुजफ्फरनगरे समारब्धवन्तौ। तत्र संस्था इयं धर्मपरायणजनानां सहयोगद्वारा महत्कार्यमिदं साधयन्ती वर्तते । नूनमेव दानद्वारा एव धर्मः संरक्ष्यते। स्वीयसंस्कृतिसंस्कृतयोः रक्षानिमित्तं समितिः इयं समर्पिता। संसूच्यते यत् देवादिदेवमहादेवस्य कृपया आचार्यौ विजय भारद्वाजः, अनिरुद्धशर्मा च कृतसंकल्पौ यत् अस्माभिः जीवने सनातनपद्धतिम् आश्रित्य किञ्चन करणीयमिति। नूनम् इष्टमित्राणां सहयोगेन गुरुकुल इत्यादिकं प्रारप्स्यते तत्र उद्देश्यानि यद्भव्यराममन्दिरस्य शिवमन्दिरस्य च निर्माणम्, कर्मकाण्ड-वेदविदयालय-स्थापना,गोशालानिर्माणम्, गुरुकुलपद्धत्या सह आधुनिकशिक्षायाः ज्ञानम्,योगाभ्यासप्रतियोगिता च।

समुद्घाटनकार्यक्रमे प्रातः 9.30 वादने होमः , भूमिपूजनं 11.00 वादने ततः पूर्णाहुतिः अभवत् । तत्र कार्यक्रमस्य अध्यक्षः आचार्यकृष्णगोपालः कथितवान् धर्मरक्षणार्थं समाजस्य प्रत्येकं वर्गस्य जनः सहभागी भवेत्। शास्त्रोक्तधर्मस्य आचारणेन मानवः सर्वथा सौख्यं लभते। अहं शुभाशिषौ एतौ तावदभिषिञ्चामि। अवसरे आचार्येण विजयभारद्वाजेन उक्तं यत् नूनमेव गुरुभिः, अन्यैश्च सामाजिकैः वयं सनाथीकृताः। अयं संकल्पः न केवलम् आवयोः अपि एषः संकल्पस्तु सनातनधर्मावलम्बिनां समस्तानां वर्तते।अनिरुद्धाचार्येण कथितं एषः आरम्भः नूनमेव तत्र पवित्रसंकल्पेन जातः अस्ति परन्तु तत्र महती अपेक्षा वर्तते यद्वयमपि तत्र सहभागिनः भूत्वा स्वीये कोशे पुण्यराशिम् अर्जयामः। ग्रामप्रमुखः कपिलसोमः पूर्वजिलापंचायतसदस्यः पुष्पेन्द्र शर्मा, अजयकुमारश्चापि स्वीयान विचारान् उपस्थितवन्तः। कार्यक्रमेस्मिन् रामजानकीसेवासमितेः समस्तपदाधिकारिणः , श्रीशिवसंस्कृतविद्यालयस्य विद्यार्थिनः ,शिक्षकाः, योगेन्द्र शर्मा, सुनील शास्त्री, विनीत शर्मा , अन्ये सामाजिकाः समुपस्थिताः आसन्।

**प्रथमपुटस्य शेषभागः**

## योगसाधना जीवनस्य सर्वविध-सम्पूर्णतायाः आधारः

प्राणायामाभ्यासं कारितवान्।

अष्ट-दिवसीयायाः योग-प्रशिक्षण-कार्यशालायाः समापन-सत्रस्यायोजनं जूनमासस्य द्वादशदिनांकेऽभवत्।समापनसत्रस्य विधिवत्प्रारम्भाय कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य वेदविभागस्य प्राध्यापकेन डॉ. अमितभार्गववर्येण वैदिक-मंगलाचरणं प्रोच्चारितम्। अस्याः कार्यशालायाः संयोजकौयोगविज्ञानविभागस्य अध्यक्षा प्रो.कलापिनीअगस्तिवर्या वेब्स-महासचिवः प्रो. रणजित् बेहेरावर्यश्च कार्यशालायाः उत्तम-संयोजनं कृतवन्तौ। अस्याः कार्यशालायाः योग-प्रशिक्षिका कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयस्य शोधच्छात्रा सुश्रीरश्मिजैनमहोदयातथा अस्मिन् विश्वविद्यालये अध्यापनक्षेत्रे कार्यरतः श्रीयुतः मिथिलेशभाकरेवर्यः चापि उपस्थितौ आस्ताम्अस्याः कार्यशालायाः साफल्यनिर्माणे शताधिक-योगसाधकानां सर्वाधिकं योगदानमासीत्।योगाभ्यासाभ्यर्थिनः प्रतिदिनं जूम-यूट्यूब-इत्यनयोःअंतर्जालीयमाध्यमेन भागं गृहीतवन्तः।अस्यां कार्यशालायां दशवर्षेभ्य आरभ्य पंचाशीतिवर्षपर्यन्तस्य सर्वैः जनैः भागः गृहीतः ।कविकुलगुरु-कालिदाससंस्कृतविश्वविद्यालयस्य नैकेः प्राध्यापकाः विद्यार्थिनः,"वेब्स" इत्यस्य सदस्याः, बालाः, वयोवृद्धाः कोरोनासंक्रमणात् विमुक्ताश्च जनाः उत्साहपूर्वकं भागम् गृहीतवन्तः।

समापनसत्रेऽस्मिन् प्रप्रथमं दर्शनशास्त्रस्य विदुष्या प्रो. कलापिनीअगस्तिवर्यया अष्ट-दिवसीय-कार्यशालायाः प्रतिवेदनं प्रस्तुतं तथा योगविज्ञानविभागस्य गतिविधीनाम् अपि चर्चा समनुष्ठिता। तत्पश्चात् प्रसिद्धदार्शनिक-वैयाकरण-कविपुंगवस्य तथा साहित्य-अकादमी-पुरस्कृतस्य कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयस्य संकायाध्यक्षस्य प्रो. मधुसूदनपेन्नावर्यस्य मंगल-सन्देशः प्रसारितः। विद्वानसावुदीरितवान् यत् योगभ्यासः प्रतिदिनाचरणीयः। तदनन्तरं वेब्स-कार्यकरिणी-सदस्या डॉ. आशालतापाण्डेयमहोदया, होशयारपुरतः सुश्रीप्रज्ञापण्डावर्या, दिल्ली-विश्वविद्यालयस्य लेडी-श्रीराम-महाविद्यालयस्य सहाचार्याडॉ-पंकजाघईकौशिकवर्या बालयोगी हर्षितश्च स्वानुभवान्प्रकटीतवन्तः।

तद्नु राष्ट्रपतिसम्मानेन सम्मानिता, अन्ताराष्ट्रियख्यातिप्राप्ता वेद-विदुषी तथा च वेब्स-अध्यक्षाप्रो. शशितिवारीमहोदया कार्यशालायाः विविधा योगाभ्यासप्रयासाः अभिनन्दिताः। पुनश्च तयोद्बोधितं यत् प्रत्येकं योगसाधकस्य कृते योगाभ्यासाः दिनचर्या एव। योगप्रशिक्षकयोः योगभ्याससम्बन्धिनः करणीयाकरणीय-निर्देशाश्च भृशं प्रशंसिताः।

समापनसत्राध्यक्षः कविकुलगुरु- कालिदास- संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासबरखेड़ीवर्यः समवोचत् यत्पोस्ट-कोविडसमये जीवनं सुखीकरणाय सुरक्षिताय च योग एव परमं साधनम्। योगसाधनयैव नवयुगस्य निर्माणं विधातव्यम्। समाजस्य अन्त्योदयं यावदेव योगाभ्यासः कारणीयः। सर्वमेतद् लक्षीकृत्य योगविज्ञानविभागः आवर्षं विविधान् कार्यक्रमान् आयोजयति।

कार्यक्रमस्य अन्ते वेब्स-महासचिवेन प्रो. रणजित् बेहेरामहाभागेन सर्वान् गणमान्यान् श्रोतृन् प्रति धन्यवादं विज्ञापितम् । समापनसत्रस्य सञ्चालनं वेब्स-सचिवा डॉ अपर्णा-धीर-खण्डेलवालमहोदयासोल्लासं कृतवती। अस्याः अष्ट-दिवसीय-योग-प्रशिक्षण-कार्यशालायाः समापनं वेब्सतरुणतरंगस्य उपाध्यक्षायाः डॉ. सुप्रियासंजूमहोदयायाः शान्तिपाठेन सम्पन्नम् अभवत् ।

# गजलम्

-महराजदीन पाण्डेयो विभाषः

**मुक्तके**

यस्य कस्यापि मधुर्मधुमयः प्रतीयेत।
पर्णपातर्तुमभि मधोर्जयः प्रतीयेत।
तस्य रोषाय कथं वा यदैषमश्चौत्रः
वृत्तिविधुरस्य मे दुःखोच्चयः प्रतीयेत।। १।।
गृहस्य भूर्यपेक्षितानि तानि किं वच्मि ।
अमूनि वर्षदुःस्थितानि तानि किं वच्मि ।
कर्षबीजोर्वरककृतं तु चिन्तितं चान्यद्
अहरहर्यानि जाठराणि तानि किं वच्मि।।२।।

**गजलम्**

स्वं रक्ष रक्षणीयास्त्वामाश्रिताः कियन्तः ।
नोचेदरुन्तुदाः स्युर्दिवसाः स्मृताः कियन्तः ।
प्राणाः कदाप्यलं स्युर्नैवेत्यचिन्तयत् कः
सत्यं तु तद्व्यसूनामिह तर्षिताः कियन्तः।

धीरो भवेति वदतो धैर्यं क्षयति ममैव
यद्यपि तदप्यनेन संजीविताः कियन्तः ।

विरहोऽसहो यदीयस्तद्दूरताऽद्य पथ्यम्
धातस्त्वयापि कीला हृदि कीलिताः कियन्तः।

एकत इहावमर्शो नहि गुण्ठनेऽस्ति मानः
परतो मुखा विपत्तौ पटमुद्रिताः कियन्तः ।

स्वं स्वं रहो न भीताः के जीवितुं जुषन्ते
मर्तुं भिषक्समूहे विवशीकृताः कियन्तः।

साधारणी प्रतिश्या क्वैषा क्व चौषका भीः
अपवार्य संवदन्तः स्वे कम्पिताः कियन्तः।

# 'कलौ कोरोनाक्रन्दनम्'



हा! कोरोना विषाणुश्च सर्वत्र भूतलेऽधुना।
छनच्छनिति नूनं हि वाष्पकणाः पतन्ति च।।१।।
कोरोनासिंहनादेन मे कामधेन्वकम्पित।
झाँकृतः ककुभोनित्यं जनानामार्तनादनैः।।२।।
करालः कलिकालोऽस्ति कालैः कवलितो जनाः।
कारुण्यं क्रन्दनं श्रुत्वा विषाणुश्च न सीदति।।३।।
इह काले कलौ व्याप्तः जीवश्चासुरतां गतः।
कारणेन ह्यधर्मस्य विषाणुश्च प्रभावितः।।४।।
ज्वरो भवति मात्रञ्च रुद्ध्यते श्वसनक्रिया।
सर्वत्राक्सीजनाभावे प्राणान्त्यजति रुग्णकः।।५।।
युद्धं भवति सर्वत्र कोरोनेयं विरुद्धये।
क्वचिद्भवति साफल्यं क्वचिद्भवति क्रन्दनम्।।६।।
मा गच्छतु! गृहं त्यक्त्वा जीवनंरक्षणाय हि।
पगे पगे विषाणुश्च व्याधिः सर्वत्र बाधते।।७।।
मुखोपरिमुखच्छादः दूरत्वं द्वै गजं सदा।
सततं हस्तप्रक्षाल्य स्वच्छतां परिपालयेत्।।८।।
भयकारी महामारी प्राणानियञ्च हारिकी।
प्रसृता वायुनासार्धमतीवकष्ट दायिनी।।९।।
गृहेषु आपदाभीतः निरुद्धाः कर्मकारकः।
बाधितः सर्व कार्याणि क्रियाशीलोऽपि निष्क्रिया।।१०।।
गिलोयं निर्मितं क्वाथमुष्णमुष्णं पिवेत् सदा।
स्वच्छतां साधयेत् सम्यक् विषाणुः नागमिष्यति।।११।।
निशा नैव सदा लोके नैवनित्यञ्च वासरः।
तथैव सुखदुःखानि तिष्ठन्ति सर्वदा नहि।।१२।।
चीन देशात् समायाता कोरोनादुष्ट दानवः।
दुःखदाता विचित्रश्च भूतले नैव दृश्यते।।१३।।
प्रातः जागरणं नित्यं व्यायामः योगासनम्।
शुच्याहारैः मितं भाषैः श्रीदीर्घायुः भविष्यति।।१४।।
सदा भवतु सानन्दं भारतीयाः सुबान्धवाः।
मास्तु चिन्तां इह लोके यात्यायाति सुजीवनम्।।१५।।

**आचार्य राधेश्याम अवस्थि 'रसेन्दु'**
कृतकार्य प्रवाचक संस्कृत महाविद्यालय वेदामऊ वैदिक विद्यापीठ बदायूँ, उत्तर प्रदेश
आवास- अम्बिकापुरी, निकट पी. डब्लू .डी बदायूँ

# सम्पादकीयम्

सम्मान्याः !

संस्कृतसंवादस्य अयमंकः भवद्भ्यः सादरं समर्प्यते। सम्पूर्णे संसारे मानवतायाः स्वरो मुखरीक्रियमाणो वर्तते। मानवजीवनोत्थानाय ये नैतिकगुणास्तेषां ह्रासेन या दशा विश्वस्य दृश्यमानास्ति सा भयंकरी। ये ये गुणा मानवविकासाय आवश्यकास्तेषां तीव्रगत्या ह्रासः सर्वत्र अकस्मान्न जातः, अपितु शनैश्शनैरेव। मनुष्यः दानं दयां सहयोगं परोपकारं सौजन्यम् औदार्यं विस्मृत्य स्वार्थ्यायैव निरन्तरं चरन् वर्तते। हन्त! महदाश्चर्यम्! स्वार्थपूर्तये स किं किं न कुरुते? प्रकृतिं दूषयति, स्वजनान् वंचयति, पशून् घातयति, मित्राणि छलयति, गुरूनपि न विजहाति। अहो! कलिनर्तनम्! किन्तु अस्यामेव परिसस्थितौ अनेके सज्जना अअपि भवादृशः सन्ति ये निरंतरं समाजसेवायै संलग्नाः परोपकारमेव कुर्वन्ति। धन्या भवन्तः सज्जनाः येषामवदानेन महीयं सुखमवाप्नोति। सत्युक्तं केनापि नीतिकारेण

सूर्यस्तपति सत्येन वायुः सत्येन वाति च।

सत्येन धार्यते पृथ्वी सत्यं सर्वत्र राजते।। मन्ये अयमेव भावस्तस्य महोदयस्येति। किन्तु सर्वथा सत्यमेतत् वंचकानां लुण्टाकानां समाज एव दानिनः परोपकारिणो भवन्ति। ये रामादिवत् प्रवर्तन्ते। येषां सर्वत्रमानो विधीयते। अस्मिन् भयंकरे कोरोनाकाले एते एव सज्जनाः परोपकारं कुर्वन्तः राष्ट्रसेवामकुर्वन् कुर्वन्त्यपि। येन विषाणुरयं प्रयातीवेति। परन्तु असावधानता न विधेया, सर्वकास्य निर्देशाः अक्षरशः पालनीयाः। येन स्वास्थ्यमुत्तमं स्यात्। स्वस्थ एव जनः समृद्धराष्ट्रस्य निर्माणं करोति। अतः प्रधानमन्त्रिणः वाक्यं सदैव स्मरणीयम्

दो गज की दूरी मास्क है जरूरी।

भवन्तः साहित्यकाराः अनवरतं कवितयालेखेन संवादेन समाजं जागरयन्तीति को न जानाति संस्कृतसंवादपाठकः? अतः भवतां समेषामादरणीयानां योगदानमवेक्ष्य भारतीया संस्कृतिरपि मोदमवाप्नोति। संस्कृतभाषापि महीयते। अहं मन्ये यदवश्यमेव संस्कृतसंवादस्य लघुप्रयासेन एकस्मिन् दिने महत्परिवर्तनं भविष्यति, येन सर्वे देशभक्ताः निजसंस्कृतिं संस्कृतं प्रति बद्धादरा भविष्यन्ति। भगवन्तं शिवं मानसेन पूजयन्ती विश्वकल्याणं कामये।

सम्पादिका

## वेदामृतम्

**नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः। यजाम देवान्यदि शक्रवाम मा ज्यायसः शंसमा वृक्षि देवाः॥१३॥**

अर्थ-इस मन्त्र में ईश्वर का यह उपदेश है कि मनुष्यों को चाहिए अभिमान छोड़कर अन्नादि से सब उत्तम जनों का सत्कार करें, अर्थात् जितना धन पदार्थ आदि उत्तम बातों से अपना सामर्थ्य हो उतना उनका सङ्ग करके विद्या प्राप्त करें, किन्तु उनकी कभी निन्दा न करें॥१३॥

पिछले सूक्त में अग्नि का वर्णन है उसको अच्छे प्रकार जाननेवाले विद्वान् ही होते हैं, उनका वहाँ वर्णन करने से छब्बीसवें सूक्तार्थ के साथ इस सत्ताईसवें सूक्त की संगति जाननी चाहिए।

**यह पहले अष्टक के दूसरे अध्याय का चौबीसवाँ वर्ग और पहिले मण्डल के छठे अनुवाक का सत्ताईसवाँ सूक्त समाप्त हुआ ॥२७॥**

**[ २८ ] अव नवर्चस्याष्कटाविंशस्य सूक्तस्याजीगतिः शनुःशेपः ऋषिः । इन्द्रयज्ञसोमा देवताः।१-६ अनुष्टुप्, ७-९ गायत्री च . छन्दसी।१-६ गान्धारः, ७-९ षड्जश्च स्वरौ।।** अब अट्ठाईसवें सूक्त का प्रारम्भ है उसके पहले मन्त्र में कर्म के अनुष्ठान करनेवाले जीव को जो-जो करना चाहिए, इस विषय का उपदेश किया है-

**यत्र ग्रावा पृथुबुध्न ऊ भवति सोतवे।**
**उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥१॥**

अर्थ-ईश्वर उपदेश करता है कि हे मनुष्यो! तुम यव आदि ओषधियों के असार निकालने और सार लेने के लिए भारी से पत्थर में जैसा चाहिए वैसा गढ़ा करके उसको भूमि में गाड़ो और वह भूमि से कुछ ऊँचा रहे जिससे कि नाज के सार वा असार का निकालना अच्छे प्रकार बने उसमें यव आदि अन्न स्थापन करके मूसल से उसको कूटो॥१॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

# स्वामी विशुद्धानन्दसरस्वती

- नारदोपाध्यायः

काशीक्षेत्रे पूर्वं कदाचित् आदर्शसंन्यासी विशुद्धानन्दसरस्वती वेदान्तशास्त्रस्य महापण्डितः आसीत् । सनातनधर्मरञ्जितं तस्य महाभागस्य समस्तजीवनम् आत्मप्रकाशेन समृद्धमासीत् । सः औपनिषदात्मकशान्तेः एवं निवृत्तेः च सजीवः चेतनात्मा आसीत्। लोकख्यातेः जनसम्पर्काच्च पूर्णतः तटस्थः सन् काश्याः अहल्याबाईतीरे पवित्राश्रमे उषित्वा आजीवनं हि आत्मसाक्षात्कारयुतां साधनां कुर्वन्नतिष्ठत् । काश्याः महान्तः विद्वांसः, ज्ञानिनः एवम् ऐश्वर्यसम्पन्नाः आढ्यजनाः ये आसन्, ते सर्वेऽपि महाभागस्य चरणयोः निपत्य, शरणागताश्च सन्तः आत्मानं महाभाग्यशालिनः मन्यन्ते स्म।



आत्मज्ञानप्राप्त्यर्थं स्वामी श्रद्धायै अत्यन्तं महत्त्वं ददाति स्म। एकदा स्वप्रियशिष्याय महामहोपाध्याय प० प्रमथनाथतर्कभूषणाय 'छान्दोग्योपनिषद्' इत्यस्य एकांशं पाठयन्नासीत् । महाभागः मनुष्यस्य प्रयाणकालिक-दक्षिणमार्गगतिविषयकं प्रकाशं कुर्वन्नासीत्, भगवतीभागीरथ्याः कलकलशान्तगति-वातावरणेऽपि निरवतासीत्, तर्कभूषणमहोदयाय सः विषयः रुचिकरः न जातः, सः ततः किञ्चिदुपरतः इव अदृश्यत । एतद्विज्ञाय महाराजः तत्समयस्य पाठनं स्थगितवान् , उक्तवान् च - 'तव मनसि सन्देहः यत् अहं यद्वदन्नस्मि तत् तस्योपरि प्रतिष्ठितमस्ति उत न इति, अयं सन्देहः त्वां श्रद्धाहीनम् अकरोत् । यस्य मनसि श्रद्धा न स्यात्, तस्य कृते एतादृशस्य वचनस्य अश्रवणं हि वरम्, एवं वक्तुः कृते अप्येतत् विडम्बनामात्रम्' इति । ततः तर्कभूषणः स्वामिचरणयोः सहसा निपत्य स्वाज्ञानकारणतः क्षमां याचितवान्। तत्समये स्वामिनः मुखात् अत्यन्तं महत्त्वपूर्णं वचनं निःसृतम् अभवद् यत् 'अद्यत्वे यथा यथा पाश्चात्यशिक्षायाः प्रभावः वर्धमानोऽस्ति तथा तथा हि संस्कृतशिक्षापद्धतिरपि प्रभूततया ह्रासतां गच्छन्ती अस्ति, अध्यात्मशास्त्रं प्रति भारतीयजनानाम् अश्रद्धा हि तत्परिणामभूता वर्तते' इति ।

स्वामी विशुद्धानन्दमहाराजः उच्चकोटिकः तपस्वी, मौनसाधकः, योगी चासीत् । तेन महाभागेन स्वमहाप्राणस्य विंशतिवर्षेभ्यः पूर्वं हि सुषुम्नानाडीद्वारा योगक्रियायाः साहाय्येन उत्क्रमणमार्गस्य अनुसन्धानारम्भः कृतः आसीत् । सः स्वप्रयासे सफलः आसीत्। केभ्यश्चिद् दिनेभ्यः पूर्वं हि स्वामिना उद्घोषितम् आसीद् यत् अहम् अमुकावसरे महाप्रयाणं साधयिष्यामीति । स्वकथनानुसारं हि यथासमयं महाभागः नश्वरशरीरात् पृथग्भूत्वा अमृतधामयात्राम् अकरोत्। निस्सन्देहं स्वामी आदर्शसंन्यासी एवं परमविरक्तः आसीदिति, शम् ।

# ॐ नमः शिवाय' इत्यस्य मन्त्रस्य महत्वम् आश्चर्यजनकम्



आचार्यः
-धीरज मैठाणी चद्रबनी,
देहरादूनम्।

श्रावणमासोऽयं शिवमर्चितु तावत्प्रशस्यो। मन्यते तदर्थ बहवः प्रकल्पाः शास्त्रेषु वर्णिताः तेषु विशिष्टः पञ्चाक्षरमन्त्रोऽयम्। शिवपुराणसंहितायाम् लिखितन्तावत्सर्वज्ञो। भगवान् शिवोऽखिलदेहधारिणां सर्वाणां स मनोरथानां सिद्धये' ॐ नमः शिवाय इत्येतं मन्त्रं प्रतिपादितवान्। अयं पञ्चाक्षरमन्त्रः सम्पूर्णविधानां बीजम् अस्ति। यथा वटस्य बीजे महान वृक्षः समाहितो भवति तथैव अत्यन्तसूक्ष्मे सत्यपि मन्त्रोयं महतार्थेन. परिपूर्णः। इत्यस्मिन् एकाक्षरे मन्त्रे त्रिगुणातीतः सर्वज्ञः सर्वकर्ता, युतिमान् सर्वव्यापी प्रभुः शिव एव प्रतिष्ठितः। ईशान आदियत्सूक्ष्म एकाक्षरूप तरलादि देवा एव नमः शिवायेति मन्त्रे स्मिन् क्रमशः स्थिताः सूक्ष्मषडक्षर मन्त्रे (ओंकारसहित ) पञ्चहरूपधारी साक्षाद्भगवान् शिवः स्वभावतः वाचक भावेन च 4 विराजमानोऽस्ति। अप्रमेयत्वाच्छिवो वाच्यो मन्त्रस्तस्य वाचकः। शिवस्य मन्त्रस्य व वाव्यवाचक भावोऽयम् अनादिकालाच्चल्य मानमस्ति यथा घोरसंसारसागरेऽनादि कालतश्चलति। तथैवसंसारान्मुक्तिदाता भगवाञ्छिवोऽपि अनादिकालतो विराजितः। यथा औषधंरोगाणां स्वभावतः शत्रुस्तथैव भगवानच्छिवः सांसारिकदोषाणां स्वाभाविकः शत्रुर्मनितः। भगवान् विश्वनाथो न स्याच्चेदयं संसारोऽन्धकारमयः भवेत, यतोहि प्रकृतिर्जडा जीवात्माऽज्ञानी अत उभाभा प्रकाशदाता परमात्मैव तयोर्बन्धनं मोक्षोपि दृश्येते अतः विचार्यस्तावत सर्वज्ञेन परमात्मना शिवेन विना प्राणिनाम् आदिसर्वस्य सिद्धिर्न जायते । यथा रोगी वैद्येन विना सुखेन रहितःक्लेशमनुभवति। तथैव सर्वज्ञशिवस्य आश्रयेणबिना संसारी जीवोऽयं नानाविधक्लेशान् भुङ्के। अतः सिद्धयति यज्जीवनस्य संसारसागराद्दुद्धारक स्वामी अनादिसर्वज्ञः। शिवस्य मन्त्रस्य व वाव्यवाचक भावोऽयम् अनादिकालाच्चल्यपरिपूर्णसदाशिवो विद्यते भगवान् शिवः आदिमध्यान्तेन रहितः स्वभावेन निर्मलस्तथा सर्वज्ञः परिपूर्णश्च तच्छिवनाम्ना ज्ञेयः । शैवागमे शिवस्वरूपं विशदरूपैन वर्णितम्। यह नाम स शिवाभिधेयोभिधानाभिधेयरूपे सति परमः शिवः मन्त्रोयं सिद्धयति।

ॐ नमः शिवाय इत्ययं षडक्षरमन्त्रः शिववाक्यं शिवस्य विधिवाक्यं न त्वर्थवादः। एतत्तस्यैव शिवस्य स्वरूपं यः सर्वज्ञः परिपूर्णः, स्वभावतो निर्मलयास्ति सर्वज्ञः शिवः यनिर्मलवाक्यं पञ्चाक्षरमन्त्रं प्रणीतवान्य्, सः प्रमाणभूतो यस्मिन् न अत एव विदुषे पुरुषाय। अपेक्ष्यते यत्स ईश्वरीयवचनेषु श्रद्धा मन्त्राणां सङ्ख्या अधिका स्यात्तथापि यस्योपदेश तुलना न केनचिन्मन्त्रेण सम भवितुमर्हा अर्थान्न एतेन समो मन्त्रः। षडक्षरमन्त्रे षडङ्गैःसहितः सम्पूर्णो वेदः शास्त्राणि च विद्यमानानि, अतःनेतेन समो मन्त्रो नास्ति। सप्तकोटि महामन्त्रेभ्योऽनेका नेकोप मन्त्रेभ्योऽयं षडक्षरमन्त्रस्तथैव भिन्नो यथा वृत्या सूत्रम् यावच्छिवज्ञानं चावन्ति विद्यास्थानानि तानि सर्वाणि षड्क्षर मंत्ररूपिणः सूत्रस्य सक्षतिभाष्यम्। येषां हृदि ॐ नमः शिवायेति मन्त्रः प्रतिष्ठितस्तेभ्योदूसरे बहुसङ्ख्यकानां मन्त्राणाम् नैकविस्तृतशास्त्राणां किं प्रयोजनम् दृढत्वेन ॐ नमः शिवायति मन्त्रः स्वीकृ तरत पठितशास्त्राणि सर्वाणि कृतानि शुभकृतसमग्राणि आदौ 'नमः' पदेन युक्तः शिवायेति त्र्यक्षराणि जिह्वाग्रे यस्य विद्यन्ते तस्य जीवनं सफलं सर्वदा।

## पाठकानां कृते सूचना

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्कः रु.४८०/- ( व्यक्तीनां कृते ) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C ) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# लघुसिद्धान्तकौस्तुभस्य समीक्षणं सम्पादनञ्च

-डॉ. प्रमोदकुमारशर्मा ( शास्त्रकविः )
सह-आचार्यः
संस्कृतमेवम्प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली-67

विद्वद्वरेण्यवरदराजाचार्यप्रणीतो लघुसिद्धान्तकौस्तुभनामको ग्रन्थः व्याकरणशास्त्रस्य अद्वितीया अपूर्वा च कृतिर्वर्तते। अस्य ग्रन्थस्य पाण्डुलिपिः भारतसर्वकारस्य संस्कृतिविभागादनुदानिते श्रीवृन्दावनशोधसंस्थाने, मथुराजनपदे, उत्तरप्रदेशे इदानीमपि मूलस्वरूपे राराज्यते।

तत्रैव गत्वा मयकैकदा सर्वप्रथममस्याः पाण्डुलिपेरवलोकनं कृतम्। मनसि च विचारितं यदेतदवश्यं मया वहिरानेतव्यमानीय च सम्पाद्य प्रकाशनीयम्। येन कृत्स्नं जगदवगच्छेद् यदिदानीमपि व्याकरणशास्त्रेतिहासस्य पुनरालेखः कियानावश्यकोऽस्ति। लघुसिद्धान्तकौस्तुभं विना व्याकरणशास्त्रस्येतिहासः सर्वथाऽपूर्ण एवाभाति। यावल्लघुसिद्धान्तकौस्तुभस्योल्लेखो व्याकरणशास्त्रेतिहासे न भविष्यति न तावद् व्याकरणशास्त्रेतिहासः पूर्णतां यास्यति। अतः क्षतिरियमवश्यं परिपूरणीयेति मत्वा ग्रन्थस्यास्य हस्तलिखितपाण्डुलिपिः मया तत्रत्यसंस्थानप्रमुखान् सम्प्रार्थ्य छायाप्रतिस्वरूपा अतिशीघ्रं स्वहस्तगता कृता।

कृतिरियं व्याकरणशास्त्रस्य जिज्ञासूनां कृते सरला विरला च चकास्ति। अत्र प्रारम्भे संज्ञापरिभाषाप्रकरणं तथा सन्धीनां परिचयः दृश्यते। तदनन्तरं त्रिलिङ्गप्रातिपदिकानां विस्तारो दृश्यते।

इदानीं यावन्मया पाण्डुलिपिरियं सामान्यतया आद्यन्तं विलोकितास्ति तथापि पूर्वरूपेणास्य ग्रन्थस्य व्याख्या इदानीमप्यवशिष्यत एव।

राजस्थानप्रान्तस्य जोधपुरनगरस्थिते कस्मिंश्चित् प्राचीने पाण्डुलिपिसंग्रहालयेऽपि कृतिरियं स्थापितास्तीति मया श्रुतं परन्तु कृते प्रयत्नेऽपि इदानीं यावन्मया न लब्धा। उपलब्धौ सत्यां तया सह अस्याः पुनरेकवारं तुलना समीक्षा चावश्यमेव भविष्यति।

अस्य ग्रन्थस्योपयोगिता च पाणिनीयव्याकरणशास्त्रप्रवेशाय महती वरीवर्ति। यद्यपि पाणिनीयप्रवेशाय वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी, सर्वसमक्षमस्ति, तथापि लघुसिद्धान्तकौस्तुभनामकोऽयं ग्रन्थः शब्दसिद्धिप्रक्रियायां सारल्यम् आनयति। अद्यत्वे लघुसिद्धान्तकौमुद्याः अध्येतारः अपि दुर्लभाः सन्ति, संस्कृतमाध्यमेन बी.ए. कक्षायां पाठ्यक्रमदृष्ट्यैव कौमुदी समुपयुक्तास्ति। अस्याः समग्रं गहनमध्ययनं तु कुत्रचित् कतिचिदेव छात्राः कुर्वन्ति।

कौमुद्यपेक्षया कौस्तुभग्रन्थोऽयं न केवलं लघुकायोऽस्ति अपितु सरलतरोऽप्यस्ति। ग्रन्थेऽस्मिन् (२१४) चतुर्दशोत्तरद्विशतसूत्राणि एव आदाय पाणिनीयव्याकरणशास्त्रप्रवेशस्य प्राथमिकं स्वरूपमतीव सारल्येन सर्वसमक्षमुपस्थापितम्।

पुराकाले समग्रा अष्टाध्यायी आचार्यैः साक्षात् पाठ्यते स्म। स कालो युगो वा निर्गतः, कतिचिद्दशकेभ्यः पूर्वं श्रीमद्भट्टोजिदीक्षितप्रणीतवैयाकरणसिद्धान्तकौमुदीमधीत्य छात्राः व्याकरणशास्त्रस्य विद्वांसो भवन्ति स्म। परन्तु वर्तमाने युगे नैतत् सम्भाव्यते। अतः व्याकरणशास्त्रप्रविविक्षूणां कृते सरलातिसरलमार्गान्वेषणमावश्यकमस्ति। एतामावश्यकतां विभाव्य मया प्रयासोऽयं क्रियते। एनां पाण्डुलिपिं प्राप्य स्वोद्देश्यपूर्तयेऽहं सफलो भविष्यामीत्यात्मनि विभावयामि।

लघुसिद्धान्तकौस्तुभाभिधेऽस्मिन् ग्रन्थे ग्रन्थकारेण विद्वद्वरवरदराजाचार्येण (२१४) चतुर्दशोत्तरद्विशतसंख्याकानि पाणिनीयसूत्राणि संगृह्य व्याकरणशास्त्रप्रवेशः सरलतमप्रक्रियया प्राथमिकस्तरे निर्धारितः। लघुसिद्धान्तकौस्तुभे (२१४) चतुर्दशोत्तरद्विशतसंख्याकानि पाणिनीयसूत्राण्येव प्रयोगे आनीतानि सन्ति। अत्र हि संज्ञापरिभाषाणां परिचयं प्रदाय सन्धीनां प्राथमिकपरिचयोऽपि कारितः। येन कश्चिदपि जिज्ञासुः छात्रः अल्पेनैव कालेन पाणिनीयव्याकरणस्य प्रारम्भिकं स्वरूपं तथा मूलभूतानि प्रारम्भिकशब्दस्वरूपाणि किमपि काठिन्यं विनैव ज्ञातुं शक्नोति। सोऽयं स्तुत्यप्रयासः अतिकोमलमतीनां छात्राणां कृते वरदराजाचार्येण पूर्वमेव आविष्कृतः।

स्वग्रन्थस्य आरम्भः ग्रन्थकारेण ॐ श्रीहरये नमः इति वाक्यात् कृतः। तथा निम्नलिखितश्लोकेन मङ्गलाचरणं कृतं दृश्यते। तथाहि -

कृष्णं प्रणम्य सर्वेशं तत्प्रीत्यै ग्रथ्यते मया।
सुवर्णैः पाणिनेः सूत्रैर्लघुसिद्धान्तकौस्तुभः॥

ग्रन्थस्यास्य प्रथमं प्रकरणं संज्ञापरिभाषाप्रकरणम् इति नाम्ना कृतः। प्रकरणस्यारम्भे चतुर्दशमाहेश्वरसूत्राणामुल्लेखो विहितः। अत्र ग्रन्थेऽस्मिन् अपि अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः इति कथनमाश्रित्य संक्षिप्तातिसंक्षिप्तशब्देषु, वाक्येषु च सूत्राणां वृत्तिः विरचिता दृश्यते। येनच्छात्राणां कृते कण्ठस्थीकरणं नाधिकं स्यात्।

प्रत्याहारसिद्धेः प्राग् अन्योऽन्याश्रयदोषपरिहाराय ग्रन्थेऽस्मिन् हलन्त्यमिति सूत्रं वारद्वयम्। अर्थान्तरमाश्रित्य पृथक्कृत्य वर्णितम्। तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रार्थं प्रदर्श्य वर्णानां स्थानप्रयत्नवर्णनं विहितमस्ति।

प्रयत्नवर्णनमतीव लघूपायेन प्रदर्शितमत्र ग्रन्थकारेण, तथाहि- 'जयां स्पृष्टम्, यणामीषत्स्पृष्टम्, शलामीषद्विवृतम्, अचां विवृतम्, चय् जश् जम् यणामल्पप्राणः। वर्गद्वितीयझषशलां महाप्राणः, अचामुदात्तादयः।' इति। अस्मिन्नेव प्रकरणे अग्रे उपसर्गाः क्रियायोगे, गतिश्च सूत्रं प्रदर्श्य केवलं विंशतिरेव प्रादयः प्रदर्शिताः। तथाहि-

प्रपराऽवसमन्वाङ्वि, प्रत्यवन्यपिपर्युप।
अत्यध्युदभिनिर्दुसु, प्रादयो विंशतिर्मताः।

अत्र श्लोकेऽस्मिन् दुस् तथा निस् एतयोरुपसर्गयोरुभयोः संग्रहो न कृतः अतः प्रादीनां संख्या विंशतिरेवावशिष्यते।

निरयते, निलयते, दुरयते, दुलयते, इत्येवमुभयोः पृथक्परिणामविषये ग्रन्थकारः प्राथमिकस्तरे न चिन्तयति। अनन्तरं छात्रः स्वयमेव पार्थक्यमवगमिष्यति। तदेवं प्रथमे प्रकरणेऽस्मिन् परमावश्यकसंज्ञापरिभाषासूत्रयोश्चयनं विधाय एकस्मिन् सुनिश्चिते क्रमे निदर्शनं कृतमस्ति। यत्र अष्टविंशतिसंज्ञासूत्राणि तथा अष्टपरिभाषासूत्राणि सन्ति, एकं च वार्तिकमुल्लिखितमस्ति। आहत्य षट्त्रिंशत् पाणिनीयसंज्ञापरिभाषासूत्रैः प्रकरणमिदं परिसमाप्य ग्रन्थकारेण प्रदर्शितम्।

ग्रन्थस्यास्य द्वितीयं प्रकरणम् अथाच्सन्धिरिति नाम्ना निर्दिष्टमस्ति। अस्य प्रकरणस्य आरम्भः एकपूर्वपरयोः, संहितायाम्, इत्युभाभ्यामधिकारसूत्राभ्यां कृतः इति अस्य प्रकरणस्य विशिष्टं वैशिष्ट्यमस्ति। सन्धिषु एतयोः सूत्रयोः महत्त्वं सर्वैरेव वैयाकरणैरनुभूयते। एताभ्यामुभाभ्यां सूत्राभ्यां विना सन्धीनां ज्ञानमपूर्णमेवास्ति। लघुसिद्धान्तकौमुद्यामेतयोः सूत्रयोः सर्वथा अभावः एवास्ति।

श्रीमद्भट्टोजिदीक्षितवर्यैः स्वकृतौ वैयाकरणसिद्धान्तकौमुद्याम् एकः पूर्वपरयोरिति सूत्रमधिकृत्य गुणसन्धिविधायकसूत्रमुल्लिखितम्। ग्रन्थस्यास्य सन्धिप्रकरणेऽस्मिन् सर्वस्मादादौ दीर्घसन्धिविधायकं सूत्रम् 'अकः सवर्णे दीर्घः' इति समुल्लिखितम् नतु यण् सन्धिविधायकं सूत्रम् 'इको यणचि' इति। अत्र प्रकरणेऽस्मिन् आदौ दीर्घसन्धिरनन्तरं गुणसन्धिः तत्पश्चाद् वृद्धिसन्धिः, तदनन्तरं च पररूपसन्धिरेतदनन्तरं पूर्वसन्धिः, ततो यण्विधायकसूत्रस्योल्लेखः यथाक्रमं प्रदर्शितः। अत्र दीर्घ-गुण-वृद्धि-पररूप-पूर्वरूपपञ्चसन्धीनामुल्लेखनानन्तरं ग्रन्थकारः इको यणचि, एयोऽचवायावः, पूर्वत्रासिद्धम् सूत्राणि उल्लिखति, सरलया प्रणाल्या अवबोधयति च। स्वल्पैः सूत्रैः, स्वल्पे समये, स्वल्पप्रक्रियया, पञ्चसन्धीनां परिचयः, इत्येवास्ति अस्य ग्रन्थस्य वैशिष्ट्यम्।

अन्यथा सुद्ध्युपास्य: एक एव प्रयोगः कोमलमतीनां बालानां कृते कियत्काठिन्यमुपस्थापयतीति को न जानाति? प्राथमिकं काठिन्यं विभाव्य छात्राः प्रायः मूलविषयात् पलायिता भवन्ति। समग्रं च विषयमतिकठिनमिति अनुभवन्ति, काठिन्यमनुभूय विषयविमुखाः भवन्ति। सोऽयमनुभवः ग्रन्थेऽस्मिन् न दृश्यते। अत एवायं ग्रन्थोऽन्येभ्यो ग्रन्थेभ्यः श्लाघ्यो वर्तते। अतिकठिनश्रमं विनैव कोमलमतयः छात्राः सारल्येन सन्धीनां ज्ञानमनेन क्रमेण कर्तुं शक्नुवन्ति। अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् इत्युक्तिस्तु सर्वैरेवावगम्यते।

परन्तु सोऽयं क्रमः इदानीं यावद् न केनापि व्याकरणशास्त्रविदुषा विचारितः। अतः ग्रन्थोऽयमिदानीमतीव प्रासङ्गिकतां भजते। हनुमानचालीसावत् लघुकायः ग्रन्थोऽयमवश्यं वैयाकरणधुरन्धरैरेव न अपितु सर्वैः संस्कृतानुरागिभिः सामान्यजनैरवश्यमवलोकनीयः। यद्ययं ग्रन्थो लोकभाषया व्याख्याय हिन्दीभाषायामनूद्य प्रकाशितः स्यात्तर्हि अवश्यं समस्तं संस्कृतं जगदुपकृतं भवेद् इत्यहं मन्ये।

द्वितीये प्रकरणेऽस्मिन् द्वाविंशत् पाणिनीयसूत्राणि आदाय अचां सन्धयः प्रदर्शिताः तथा त्रीणि च वार्तिकानि यथास्थानमुपयुक्तानि, सोदाहरणं च व्याख्यातानि।

अच्सन्धिप्रकरणानन्तरं प्रकृतिभावप्रकरणमपि अतिसंक्षेपेण षट् सूत्राण्यादाय सोदाहरणानि च व्याख्याय झटिति समाप्तीकृतम्। प्रकरणेऽस्मिन् सम्बुद्धौ शाकल्यस्येतावनार्षे, इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च, प्लुतः, इत्येतेषां सूत्राणामावश्यकता प्राथमिकस्तरे नैवास्तीति विभाव्य ग्रन्थकारः नैतानि सूत्राणि प्रकृतिभावप्रकरणे स्थापयति। केवलं प्रगृह्यसंज्ञामादाय प्रकृतिभावं साधयति। अस्य ग्रन्थस्येदं तृतीयं प्रकरणमस्ति।

चतुर्थं प्रकरणं हल्सन्धिप्रकरणमस्ति। प्रकरणेऽस्मिन् केवलं त्रयस्त्रिंशत् सूत्राणामुपयोगः कृतः, त्रीणि च वार्तिकवचनानि समुद्धृतानि सन्ति। प्रकरणेऽस्मिन् श्चुत्व-ष्टुत्व-जश्त्व-चर्त्व-अनुस्वार-परसवर्णसन्धयः प्रदर्शिताः। ङमुट्-धुट्-तुक्-रुत्व-सत्व-विसर्गत्वविधानं प्रदर्शितमस्ति। प्रकरणेऽस्मिन् जिह्वामूलीय-उपध्मानीयविधानं तथा तस्य परमाम्रेडितम्, कानाम्रेडिते इति सूत्रे च न प्रदर्शिते।

पञ्चमं प्रकरणं विसर्गसन्धिप्रकरणमस्ति। प्रकरणेऽस्मिन् स्वादिसन्धि : समाहितीकृता ग्रन्थकारेण। कुप्वोः क पौ चेति सूत्रमत्रैव सोदाहरणं निक्षिप्य उपस्थापितम्। कौमुद्यादिग्रन्थेषु सूत्रमिदं हल्सन्धिप्रकरणे स्थापितमस्ति। मनोरथः इत्युदाहरणस्थाने तपोरतः इत्युदाहरणं प्रदत्तमस्ति। अन्येषां सूत्राणामुदाहरणानि कौमुदीग्रन्थस्थानि एव विलसन्ति। सोऽचि लोपे चेत्पादपूरणम् इति सूत्रमत्र न प्रदर्शितम्। प्रकरणेऽस्मिन् चतुर्दशपाणिनीयसूत्राणि सन्ति, एकं च वार्तिकमस्ति।

ग्रन्थेऽस्मिन् सन्धीनां निरूपणानन्तरेव षड्लिङ्गनिरूपणं कृतमस्ति। षड्लिङ्गेषु सर्वप्रथममजन्तपुल्लिङ्गशब्दानां सप्तविभक्तिषु शब्दरूपसंसिद्धिः प्रदर्शिता। अकारान्तादिशब्दक्रमः प्रकरणेऽस्मिन् अभिमतोऽस्ति। प्रथमादिविभक्तिषु यथाक्रमं शब्दरूपसिद्धिः प्रदर्शिता।

श्रीमद्वरदराजाचार्यस्य ग्रन्थेऽस्मिन् सूत्रव्याख्यासमये विशिष्टमनुशासनं दृश्यते। प्रत्येकसन्धिप्रकरणे अच्-हल्-विसर्गसन्धिषु द्वि-द्विवारमेव सूत्राणां पदकृत्यं प्रस्तौति, प्रत्युदाहरणं च प्रयच्छति, सर्वत्र सूत्रवृत्तिं संक्षेपे प्रदर्श्य उदाहरणमादाय प्रदर्शयति। पुनरग्रे च गच्छति। अग्रिमं च सूत्रमनेनैव आत्मानुशासनेन व्याख्याति। परन्तु रामाय इति प्रयोगसिद्धये सः समग्रं पाण्डित्यं, वैदुष्यं, प्रौढित्वं च प्रदर्शयति। स्थानिवदादेशोऽनल्विधाविति सूत्रे अर्थप्रदर्शनपूर्वकं पदकृत्यमप्युल्लिख्य ग्रन्थेऽस्मिन् प्रौढत्वमानीय प्रदर्शयति, तथाहि - तेन, तस्मात्, तस्य, तस्मिंश्च विधौ माभूत्। तेन विधौ कौस्तुभास्कन्ने। अत्र सस्य स्थानिवत्त्वेन विसर्गवदट्त्वमाश्रित्याड्व्यवायेऽपीति णत्वं प्राप्तम्। अयोगवाहानामस्योपरि शर्षु चेत्युक्ते विसर्गस्याट्त्वम्। यमानुस्वारविसर्गजिह्वामूलीयो-पध्मानीयास्त्वयोगवाहाः। तस्मात् परस्य विधौ द्यौः, पन्थाः, अत्र हल्ङ्यादिलोपो न। तस्य विधौ द्युकामः। अत्र लोपोव्योर्वलीति न। तस्मिन् विधौ राम इष्टः। अत्र हशि चेत्युत्वं न। इत्येवं महद् गभीरं व्याख्यानमाश्रयति। अस्य पदकृत्यस्य अथवा व्याख्यानस्य प्राथमिके स्तरे आवश्यकता नास्ति। एतत्तु वैयाकरणसिद्धान्तकौमुद्यामपि मूले नोल्लिखितम्।

प्रौढमनोरमायां दीक्षितवर्यैः सूत्रमिदं सपदकृत्यं व्याख्यातम्। ग्रन्थेऽस्मिन् सम्बोधनविभक्तिरूपाणि सप्तमीविभक्तिरूपाणां सिद्ध्यनन्तरं प्रदर्शितानि न तु प्रथमाविभक्त्यनन्तरम् इत्यस्य ग्रन्थस्य नावीन्यं वैशिष्ट्यञ्च वर्तते। अकारान्तरामशब्दस्य रूपाणि सप्तविभक्तौ संसाध्य अकारान्तसर्वनामसंज्ञकसर्वशब्दस्य संसिद्धिरत्र न दृश्यते। अपितु आकारान्तस्य विश्वपाशब्दस्य रूपसिद्धिः प्रदर्शिता। एतदनन्तरम् इकारान्तस्य हरिशब्दस्य ईकारान्तस्य सखीशब्दस्य च निरूपणमस्ति।

अग्रे ऋकारान्तशब्दरूपनिरूपणानन्तरं 'नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम्। तेन पित्रादीनां नोपधादीर्घः' इति मूले एव विलिखितं दृश्यते। एतदनन्तरं येषाम् ऋकारान्तशब्दानाम् उपाधादीर्घो न भवति ते शब्दाः एकस्मिन् श्लोके संगृह्य प्रदर्शिताः सन्ति। तथाहि-

पिता, माता, ननान्दा, ना, स्वसेष्टृभ्रातृयातरः।
जामाता दुहिता देवा नौटि दीर्घोपधा दश॥

यद्यपि श्लोकोऽयमन्यत्र टीकाग्रन्थेषु अन्यथैव उपलभ्यते, तथाहि-

पिता माता ननान्दा ना स्वसेष्टृभ्रातृयातरः।
जामाता दुहिता देवा तृन्तृज्भ्यां रहिता नव॥ इति।

लघुसिद्धान्तकौस्तुभे ऋकारान्ता दशशब्दाः श्लोकमाध्यमेन एतादृशाः निर्दिष्टा यत्र उपाधादीर्घो न भवति ते पितृ-मातृ-ननान्दृ-नृ-स्वसेष्टृ, भ्रातृ-यातृ-जामातृ-दुहितृ-देवृशब्दाः सन्ति। एते तृन्तृच् प्रत्ययाभ्यां न निर्मिताः। अपितु उणादिनिष्पन्नाः सन्ति, अतोऽत्र उपधादीर्घो न भवति। अन्यत्र टीकाग्रन्थेषु यो हि श्लोको वर्तते तत्र नव शब्दा एव दर्शिता, न तु दशशब्दाः, तत्रैकः नृशब्दो न परिगणितः। अत्र च स्पष्टमुल्लिखितः इति अस्य लघुसिद्धान्तकौस्तुभग्रन्थस्य वैशिष्ट्यमस्ति। प्रकरणेऽस्मिन् ग्रन्थकारेण अशीतिः सूत्राणि उपयुक्तानि, वार्तिकद्वयं च प्रदर्शितम्। अत्रैव प्रकरणमिदं ग्रन्थकारेण परिसमाप्यते।

एतदनन्तरमजन्तस्त्रीलिङ्गप्रकरणे आबन्तशब्दरूपसिद्धिः प्रदर्शिताः। अत्रापि आबन्तस्य सर्वनामसंज्ञकसर्वाशब्दस्य सिद्धिर्न प्रदर्शिता। प्रकरणेऽस्मिन् दशसूत्राणि एव आदाय समग्रमजन्तस्त्रीलिङ्गप्रकरणं प्रतिपादितमस्ति।

अजन्तनपुंसकलिङ्गनामकप्रकरणे अजन्तनपुंसकलिङ्गशब्देषु सर्वप्रथमं ज्ञानशब्दस्य रूपाणि संसाधितानि सन्ति।' अस्मिन् प्रकरणे 'अद्डतरादिभ्यः पञ्चभ्यः' इति तथा 'टेः' इत्येतत् सूत्रद्वयं न प्रदर्शितं नापि 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' 'एच इग्घ्रस्वादेशे' इति सूत्रद्वयं समुल्लिखितम्।

एतदनन्तरं ग्रन्थोऽयं परिसमाप्तः। हलन्तशब्दानां विषये चर्चा ग्रन्थेऽस्मिन् न दृश्यते नापि तिङन्त-कृदन्त-कारक-समास-तद्धित-स्त्रीप्रत्ययप्रकरणं विलोक्यते। विद्वद्वरवरदराजाचार्यप्रणीतग्रन्थोऽयं मया स्वयमेव महता परिश्रमेण सम्पाद्य समीक्ष्य च सर्वेषां भवतां पुरस्तात् आनीतः। अस्य ग्रन्थस्य व्याख्या निकटभविष्ये शीघ्रमेव करिष्यते। इति शम्।

## ।।सभामेव पश्यामि।।

डॉ.निरंजनमिश्रः
हरिद्वारम्

क्वचिमानवानां क्वचिद्दानवानां
क्वचिद्दिव्य हर्म्ये तपस्यारतानाम्।
क्वचित्कानने वा बुभुक्षातुराणां
सभामेव पश्यामि किञ्चिन्न चान्यत्।।1
क्वचिद्रत्नसिंहासनार्थप्रियाणां
क्वचिद्ग्रासस्यैव रत्नाकराणाम्।
क्वचिद्देशसौभाग्यसंहारकानां
सभामेव पश्यामि किञ्चिन्न चान्यत्।।2
क्वचिन्नीतिवल्लीदलैर्जीवितानां
क्वचिन्नीतिनीतार्थविध्वंसकानाम्।
क्वचित्पुष्पपीयूषपानातुराणां
सभामेव पश्यामि किञ्चिन्न चान्यत्।।3
क्वचिच्छत्रुसंकल्पपूर्तौ रतानां
क्वचित्तद्विलासोत्सवोद्धारकानाम्।
क्वचिच्छत्रुसीमन्तिनीकामुकानां
सभामेव पश्यामि किञ्चिन्न चान्यत्।।4
क्वचित्कर्मनिष्ठाकथावाचकानां
क्वचिद्धर्मधौरेयवाक्लोलुपानाम्।
क्वचित्काव्यकान्तारपंचाननानां
सभामेव पश्यामि किञ्चिन्न चान्यत्।।5

## काव्यदशकम्

डॉ.अरविन्दकुमारतिवारी
arvindt490@gmail-com

जगन्नाथं प्रभुं योऽसौ रथसंस्थं सबान्धवः।
समाकर्षति यात्रायां तमाकर्षति स प्रभुः।। १
आदग्धस्त्वां विकलनयनो लोकते लोक एष
आमत्तः किं भवसि महतीं प्राप्य शक्तिं दयालो!
सन्देशं मे शृणु सपदि रे मेघ! वर्षाधुनापः
सन्तप्तानां मुखकमलजा आशिषो लब्धुकामः।। २
उष्णो वायुर्वहति शनकैर्वर्धयन् स्वेदबिन्दून्
मेघो व्योम्नः सरति खलवद् दर्शयन् शुक्लरूपम्।
मन्दं दत्ते व्यजनमनिलं सद्वणिग्वत् सुवस्तु
रात्रौ निद्रा त्यजति मनुजं निर्धनं कामिनीवत् ।। ३
वृष्टं प्रेम्णा सलिलममलं यत्त्वया मेघ! मित्र!
तेन प्रीता व्यथितवसुधा दर्दुराणां मुखेन।
आशीर्वादं बहुविधमियं पीततोया ददाति
स्थित्वा किञ्चिन्नय सविनयं नन्दयन् मां सखायम्। ४
क्वचिद्विद्युत्पातैः क्वचिदपि घनानां प्रपतनैः
क्वचिद्वृष्ट्या लोको म्रियत इव पृथ्व्यां प्रतिदिनम्।
अनावृष्टिः सृष्टौ भवति बहुवृष्टिः क्वचिदह
जगन्नाथ स्वामिन् शमय समये सर्वविपदः।। ५
यस्याः सूक्तिसुधां निपीय बहवो मातुर्बुधा भारते
सञ्जाताः प्रथिताः परन्त्वनुदिनं निन्दन्त्यहो तां खलाः।
दिव्यां संस्कृतमातरं मुनिनुतां नित्यं नवीनामिमां
वन्दे कामदुघां सुखं श्रुतमयीं निस्संशयं श्रद्धया।। ६
स्वप्ने दूरमयं सुधांशुरतुलशम्भोर्ललाटाद् बहि-
र्यातः सम्प्रति विस्तृते नभसि हा भ्रान्त्वागतो लज्जितः।
निष्कान्तिः सितकन्दुकाकृतिरिति श्रद्धाविनीतः शशी
संस्प्रष्टुं न समिच्छतीव कवयः! श्रीविश्वनाथं भिया।। ७
मर्त्यान् मारयतीव चण्डकिरणैस्तिग्मांशुरेषो+निशं
नासौ वर्षति मेघराडपि मुहुर्नो वाति शीतानिलः।
रे रे दर्दुरवंशजाः! कथमये मौनं श्रिता गीर्धना
आषाढे ध्वनिमाकुला न मधुरं काले कुरुध्वेऽधुना।। ८
मैत्रीं साधुजनेन वञ्चकजनैर्दूरान्नमो दुर्जनै-
र्प्रीतिं गुणिभी रतिं सुकविभिस्स्नेहं बुधैर्भाषणम्।
वैराग्यं बहुलोलनेत्रजनितैर्नव्यैः कटाक्षैर्मुहुः
साकं यः कुरुते स एव लभते निद्रां दिनान्ते सुखम्।। ९
त्वय्यस्यां बहवो+मलाः श्रुतिमुखाः स्नान्तीव नित्यं बुधाः
ध्यायन्तो जननीं परन्त्वगणितास्ते सेवमानास्तटम्।
बम्बम्बन्निगदन्ति शम्भुहृदया रूपं स्मरन्तोऽद्भुतं
ये केचिद्भुवि यापयन्ति दिवसांस्तांस्त्वां नमामो वयम्।। १०

## निष्ठुरा कोरोना



प्रणेता
डॉ.नन्दप्रदीप्तकुमारः
वैदिकगणः

बन्धो ! सत्यं शृणु
आगता राक्षसी महामारी
भयानकी विभीषिकामयी
विषाणुस्फुरन्ती महाभौतिकी
मुण्डप्रिया श्मशानाकर्षिणी
अतीव चञ्चला
निष्ठुरा कोरोना
असह्या दुर्भेद्या दुसाध्या कदाचित् ।

● ● ●

---पिशाचिनीव ग्रासयति
---शिवज्वरवत्त्रासयति
न पितरं न मातरं न सुतं न कन्यां
न जायां न बान्धवान्
कानपि न त्यजति सा
न पश्यति प्रियाप्रियं
सर्वान् क्लिश्यते
सपरिवारं गृह्णाति
अन्तकालयं प्रेषयति शीघ्रम् ।

● ● ●

---श्रुतवान् खलु
स्वजन-त्यक्तानां करुण-विलापम् ?
---दृष्टं वा अश्रुपूर्णनेत्राणि ?
----त्यक्तास्त्वया परिवार-सदस्याः ?
----पश्य, विधिरहित-शवदाहोत्र प्रचलति
----न मुखाग्निः नान्तेष्टिक्रिया वैदिकी
कस्मात् वावाञ्छीषि श्मशानम्
अनुशोचतात्तेषामदूरदर्शिनाम् ।

● ● ●

---मास्तु सर्व, अनुरुद्धे प्रिय !
कालपाशात् बिभिहि
हुंकारं त्यज
सर्वकारवचनं बुध्यस्व
कर्णौ कुरु चिकित्सकनिर्देशम्
जन-संघाद्दूरं व्रज
झटिति पिधेहि मुख-नासिके
वारम्बारं हस्तौ प्रक्षालय
मा कुरु बहिर्गमनम्
टीकां गृहाण
स्व-तथ्यं प्रदेहि सर्वकाराय
आत्मानं रक्ष परिवारं रक्ष
स्वगेहे तिष्ठ सुखी भव सुस्थो भव
एष आदेश एष उपदेशः
एतदनुशासनम् ।

## श्रीजगन्नाथ-सप्तकम्

प्रकाशकान्तचिन्मयं प्रसन्नदारुविग्रहं
प्रफुल्लफुल्लसुन्दरं पुरीप्रमोदमन्दिरम् ।
विषाणुसंघशोषिणं विशालवैद्यघोषिनं
सहास्यगोललोचनं महाप्रभुं भजाम्यहम् ।।१
परंपराविमण्डितं तटे वटे मठे रतं
महाप्रसादमज्जितं महानुभावसज्जितम् ।
सुवर्णकीर्णनिर्जितं समन्दमन्दहासितं
पहण्डिनृत्यपण्डितं जगद्गुरुं भजाम्यहम् ।।२
त्रितापपापनाशकं त्रिधातुदोषघातकं
सुपञ्चभूतशोधकं विषाणुवेगरोधकम्
नितान्तशान्तिदायकं महार्तिनाशकारकं
सदा जगत्सुरक्षकं महाप्रभुं भजाम्यहम् ।।३
रथे कदापि सत्वरं विचित्रवीर्य्यमीश्वरं
मुखारविन्दसिन्दूरं सगद्गदं सुधासरम् ।
महापुराणसत्करं महेश्वरीपुरःसरं
सघोषहर्षतत्परं सदाशिवं भजाम्यहम् ।।४
निवासनीलपर्वतं प्रफुल्लपीतसत्पटं
समस्तवैष्णवाश्रितं समुद्रकूलनिर्जितम् ।
नितान्तशान्तचिद्घनं घनाघनप्रभायुतं
नियन्तृरोगभौतिकं भिषग्वरं भजाम्यहम् ।।५

## नक्रराज-वानर-कथा



महाचार्य्यः मनतोषः भट्टाचार्यः
वाली,हाओडा,पश्चिमवङ्गः।।
(कथासाहित्यप्रकरणे
ममायं चतुर्दशतमः प्रयासः)

कश्चिन्नक्रो वसति सरितो मध्यभागे सभार्यो
मध्याह्ने स स्वपिति च तटे प्रत्यहं वालुकायाम्।
तीरे जम्बूतरुरतिवृहच्छोभते वानरेन्द्रः
कश्चित्तत्र प्रवसति तयोर्मैत्रमासीत् प्रगाढम्।।१।।
चित्वा जम्बोरतिमधुफलं प्रत्यहं वानरेन्द्रो
भुङ्क्ते नक्रं परमसुहृदं भोजनार्थञ्च दत्ते।
भुक्त्वा नक्रः फलमपि पुनः प्राददच्चावशिष्ट-
मेवं मिष्टं फलमपि कदा नाहमीश प्रभुङ्क्ते।।२।।
तृप्ता नक्रं प्रवदति सती नक्रजाया निशायां
कस्मात् स्थानात् त्वमिति लभसे मिष्टजम्बूफलानि।
पृष्टो नक्रः कथयति रमां जम्बुवृक्षे सखा मे
तीरे कश्चिन्निवसति कपिर्यश्च मह्यं ददाति।।३।।
नित्यं भुक्त्वा सुमधुरफलं निश्चितं वानरस्य
हृत्पिण्डं वै सुमधुरतरं स्यात्तु मन्ये ह्युदित्वा।
हृत्पिण्डं तत्त्वमिह च कपेः कान्त मे देहि शीघ्रं
भुक्त्वा नाहं सुकपिहृदयं किञ्चिदन्यत् प्रभुञ्जे।।४।।
श्रुत्वा कान्तामधुरवचनं नक्रराजो ह्यगत्या
मध्याह्ने तं प्रियकपिवरं प्राप्य नद्यास्तु तीरे।
प्राह प्राज्ञ प्रभुरसि कपेस्त्वं हि मे गौरवाय
मत्तः श्रुत्वा तव गुणकथां कामिनी साम्प्रतं त्वाम्।।५।।
नीत्वास्माकं सपदि दिशते माञ्च गन्तुं गृहं सा
बन्धो ते हि प्रवचनसुधां कामिनी मे निपीय।
तृप्ता प्रीता भवति चलतु प्राग्विलम्बं न कार्यं
नाहं जाने तरणमिति ते यामि गेहं कथं हा।।६।।
नक्रो वक्ति प्रियकपिवर त्वां स्वपृष्ठे वहामि
हैवञ्चास्तु प्रिय तव गृहं नीयतां मान्तु शीघ्रम्।
नक्रः पृष्ठे सपदि सुहृदं वानरं प्रीतमुद्वा
नद्यां गच्छन् कथमपि कपिः सक्षमः स्यात् प्रयातुम्।।७।।
मत्वा चौवं कथयति कपिं मित्र सत्यं वदामि
कान्ता भोक्तुं तव हि हृदयं चेच्छति प्राणतुल्या।
तस्मान्नीत्वा मम जलगृहं यामि बन्धो क्षमस्व
नक्रस्यैवं परुषवचनं वानरेन्द्रो निशम्य।।८।।
मूर्खं नक्रं कथयति सखे हा कथं त्वं न पूर्व
यात्राकाले वदसि खलु मां रक्षितं चित्तपिण्डम्।
शाखायां किं वहसि सुसुहृत्ते गृहं हीनपिण्डं
तस्माच्छीघ्रं प्रति चल तटं ते ददेऽहं स्वपिण्डम्।।९।।
मूढो नक्रस्त्रुटिरिति मया या कृताद्यैव शोध्या
मत्वा शीघ्रं प्रचलति तटं वानरः प्राप्य तीरम्।
पृष्ठं त्यक्त्वा झटिति स तरोः काण्डमारुह्य नक्रं
वक्त्यप्राज्ञ प्रतिचलतु भोः को हि तिष्ठेदपिण्डः।।१०।।
मत्वाऽहं त्वा मम हितकरं बान्धवं विस्मृतोऽस्मि
नक्राणां हा कथमपि कपेः साधु मित्रं भवेन्नो।
मांसाशी त्वं मम तृणफले स्तः प्रिये नावयोर्हि
मैत्रं भाव्यं विफलहृदयो नक्रराजः प्रतस्थे।।११।।
मांसे यस्य प्रभवति रुचिस्तेन साकं कदाचित्
निर्मांसाशी यदि च कुरुते मित्रतां वै कथञ्चित्।
श्वो वा सद्यो भवति मरणं वैपरीत्ये न साधुः
ज्ञातं शाखामृगमकरयोः काव्यमेतत् पठित्वा।।१२।।

ग्रहेशदर्पहारिणं खगेशयानचारिणं
नृशंस-कंसमर्दनं समस्तगोपशासनम् ।
सरागराधिकाधवं कृपालुनीलमाधवं
नवीनयौवनोज्वलं भजे निचोलमुज्ज्वलम् ।।६
नियोगभोगभक्षणं वियोगवेगमर्षणं
सुपुष्पहारधारिणं चराचरस्य पारिणम् ।
समन्त्रतन्त्रनायकं प्रवीणवेणुवादकं
विषाणुमुक्तिदायकं भजे सुखप्रदायकम् ।।७

# -उत्कलेषु संस्कृतचर्च्चा-



-नन्दप्रदीप्तकुमारः

सुरमुखरसभोक्त्रे भोगमोक्ष्यैकदात्रे
नवनिधिगुणधात्रे स्वात्मविज्ञानगोत्रे ।
सरलमधुरवक्त्रे लोककल्याणकर्त्रे
विपुलसुखविधात्रे संस्कृताय प्रणामः।।

उत्कलीयाः संस्कृतप्रियाः । संस्कृतं सार्वभौमिकम् । अमरभाषा-समुज्ज्वलं संस्कृतं न कस्यापि विशिष्ट-जातेरुपकारकं नापि सांप्रदायिकत्वेन परिचितम्, अपितु समेषां मानव-जातीनां मंगलं विधातुं सर्वसमर्थमिति नातिशयोक्तिः । संस्कृतेषु सर्वादौ संगीतशास्त्रं विचार्यते । रसस्वरूपं संगीतम् । यं पीत्वा कृतकृत्यो जायते जनः । भारतीय-संस्कृतौ संगीतस्य स्थानं चरमं परमञ्च । कला-साहित्य-क्षेत्रे संगीतस्य प्राधान्यता दरीदृश्यते। जनजीवने संस्कृतिक्षेत्रे संगीतस्य महती आवश्यकता वर्तते । छन्दोबद्धं पद्यात्मकं लय-तालयुक्तं संगीतं वाद्य-नृत्यादिभिः लोलायितम् । उत्कलीय-आर्य-अनार्य-जनजातीनां सर्वेषां संगीतक्षेत्रे अवाधप्रवेशः । ते स्व-स्व भाषामाध्यमेन भावानुकूलं संगीतं रचयन्ति,परिवेषयन्ति च ।

संस्कृतभाषायां संगीतक्षेत्रे महाकवि-जयदेवः सर्वादौ सुपरिचितश्चिरनमस्यः, विश्वप्रसिद्ध उत्कलीयः । तन्निर्मितं गीतगोविन्दं न केवलं श्रीमन्दिरे अपि तु खिलेषु भारतवर्षेषु धर्मग्रन्थरूपेण विवेचितम्। पुरा श्रीजगन्नाथमन्दिरे देवदासी-नृत्यप्रथा प्रचलिता आसीत्। नृत्येन सह संगीतमनिर्वार्यमिति मनसि निधाय महाप्रभोः श्रीजगन्नाथस्य श्रीकृष्णस्वरूपं ध्यायं ध्यायं तन्निर्देशेन च कोमलकान्तपदावलिभिः सुसज्जितं जयदेवो गीतगोविन्दं रचितवान् । पश्चात् परवर्तिनो बद्धपरिकराः कवयः संगीतक्षेत्रे प्रविष्टाः । सफलीभूताश्च । समुत्पन्नेषु कविषु केषांचन नामानि अत्र न विस्मर्तव्यानि ।

कविचन्द्र-राय-दिवाकर-मिश्रेण निर्मितं तत्पृष्ठपोषक-गजपति-पुरुषोत्तमदेव-नाम्ना भणितं दशसर्ग-विशिष्टं 'अभिनव गीतगोविन्दम्' , पञ्चदश-शताब्यां राय-रामानन्देन लिखितं 'जगन्नाथवल्लभ'-नाटकम्, जयदेवाचार्यस्य 'पीयूषलहरी'- एकांकिका, यतीन्द्र-रघुत्तम तीर्थस्य 'मुकुन्दविलास' -महाकाव्यम्, कृष्णदासकृत-'गीतप्रकाशः', नित्यानन्दकविकृत 'शिवलीलामृतम्', तत्कृत-'श्रीकृष्णलीलामृतम्', शतदेव-मिश्रस्य 'मुदितमाधवम्', अनादि-मिश्रस्य 'मणिमाला'-नाटिका-'केलिकल्लोलिनी'- 'रसगोष्ठी' रूपकानि प्रणिधानयोग्यानि भवन्ति । षोडश-शताब्द्यां मोगल-साम्राज्ये सुपरिचित-आकवर-सभापण्डितः संगीतज्ञः कृष्णदास बडजेना महापात्रः 'गीतप्रकाशं' रचितवान् । तस्मिन् समये हलधर मिश्रस्य 'संगीतकल्पलता', हरिचन्दनस्य 'संगीत-मुक्तावली', सप्तदश-शताब्द्यां रघुनाथ रथस्य 'नाट्यमनोरमा' 'संगीतार्णव-चन्द्रिका', नारायण मिश्रस्य 'संगीतसरणिः', कविचन्द्र-पुरुषोत्तम-मिश्रस्य 'तालसर्वस्वः', शार्ङ्गदेवस्य 'संगीतरत्नाकरः', पारलाखेमुण्डिराज-गजपति-जगन्नाथ-नारायणदेवस्य 'संगीतनारायणः', पद्मनाभ-नारायण-देवस्य 'तालसर्वसारसंग्रहः', 'चतुर्दण्डिप्रकाशिका'- 'रागचित्रादीनि संगीत-पुस्तकानि रससिक्तानि सन्ति । अष्टादश-शताब्द्यां गोविन्द-कविभूषण-सामन्तरायस्य 'समृद्धमाधव'-नाटकम्, कमल लोचन खड्गरायस्य 'संगीत चिन्तामणिः', 'गीतमुकुन्दम्', व्रजयुवविलासादीनि संगीत-शास्त्राणि च समुद्भवानि । काव्यालंकार-नाटक-एकांकिकादि-क्षेत्रेषु गंजाम-मण्डलाधिप-शेरगड-राज्याधिपति-जनार्दन-प्रोत्साहित-कविना शितिकंठेन द्वादशसर्गविशिष्टं 'गीतसीतावल्लभम्' महाकाव्यं प्रस्तुतम्। द्वादशताब्द्यां कोणार्क-सूर्य-मन्दिरनिर्मातृ नरसिंह देवस्य सभाकविना विद्याधरेण 'एकावलीनाटिका' विनिर्मिता । विश्वप्रसिद्ध-विश्वनाथ कविराजेन 'साहित्यदर्पणः', 'चन्द्रकला' नाटिका अन्यानि बहुग्रन्थरत्नानि संपादितानि । चण्डिदासेन 'काव्यप्रकाशदीपिका' विनिर्मिता । सान्धि-विग्रहिक-महामहोपाध्याय-सामन्तचन्द्रशेखरेण 'सिद्धान्तदर्पणः' संपादितः । कृष्णानन्द-सान्धिविग्रह-महापात्रेण 'सहृदयानन्द'-महाकाव्यं विरचितम् । राधामोहन बक्सिना 'भारत भ्रमण'-काव्यमकारि । साहित्य क्षेत्रे कविचन्द्र भुवनेश्वर रथस्य 'लक्षणा परिणयः', वीरबलभद्रपुर शासन निवासिनः मधुसूदन तर्क वाचस्पतेः 'हनुमत्सन्देशः', 'तारा शशांकः','मायाशवरी', 'लक्ष्मीशतकं', 'गजशतकं', 'सोमनाथ-शतकानि च प्रसिद्धाः ग्रन्थाः । पुरी-सदाशिव-संस्कृत-संस्थानस्य प्रतिष्ठापकेन अध्यक्ष चरेण आचार्य हरिहर दाशेन च बहुग्रन्थाः विरचिताः । तिगिरिआ-निवासिना भुवनेश्वर-मिश्र-बडपण्डा-महोदयेन 'आनन्द-वृन्दावन-चम्पूः' संकलितः । महामहोपाध्याय सदाशिव मिश्रेण 'चन्दन चम्पूः', 'कल्यापत् धर्मसंग्रहौ' च विरचितौ । सदाशिव-संस्कृत-महाविद्यालय- भूतपूर्वाध्यक्षेण विश्वनाथ-महापात्रेण 'काञ्ची विजयः', 'सरस्वती विलासः', 'सावित्री परिणयः' प्रमुखाः ग्रन्था विलिखिताः । गोपबन्धु विद्याभूषणेन 'रुद्धद्वारः', 'कन्योद-राजवंश चरितम्', 'माठरवंशः' ग्रन्थाः संकलिताः । कविशेखर-आर्त्तत्राण-मिश्रेण 'काशीशदर्पदलनं' प्रस्तुतम् । सुदर्शन-पाठिना 'दीपिका नाठकम्', 'सिंहल विजय नाठकम्', 'करुणा पारिजातः', 'पादुकाविजयः' इत्यादीनि नाटकानि लिखितानि । ब्रह्मपुर-निवासिना अनन्त-त्रिपाठिना 'निबन्धमाला', 'लावण्यवती'- 'वैदेहीश विलासयोः संस्कृतानुवादाश्च' संपादिताः । पण्डित-प्रबोध-कुमार-मिश्रेण 'मलय दूतम्', 'स्वप्नदूतम्', 'बन्दिन आत्मकथा' दि ग्रन्थाः विरचिताः । एतदतिरिक्ता अर्वाचिनेषु गोपीनाथ-महापात्रस्य 'कालिदास कवितारस-माधुरी', 'जगन्नाथाष्टकम्'', 'दीनबन्ध्वष्टकम्', कालिदासाष्टकानि अनुपमानि सन्ति । जगन्नाथ रथस्य 'अनुभूति शतकम्', गोविन्दचन्द्र मिश्रस्य 'जयदेव प्रशस्तिः', हरिहर नन्दस्य 'सिद्धान्त कौमुदी टीका', हरेकृष्ण महतावस्य 'चाणक्य विजयम्', चन्द्रशेखर मिश्रस्य 'जगन्नाथ शतकम्', जयकृष्ण मिश्रस्य 'मातृमुक्ति मुक्तावली', बानाम्बर आचार्यस्य 'केन्दुझर राजानः चरितम्', सीतादेवी खाडंगायाः 'अरण्यरोदनम्', विश्वनाथ वर्मणः 'श्रीवर्म रुक्मिणी परिणयः', राधानाथ रायस्य 'भारती वन्दना', वाउरी बन्धु नन्दस्य 'मनोदूतम्', दयानिधि मिश्रस्य 'सूर्यदूतम्', नीलकंठ वाचस्पतिनः 'गंगाधर चम्पूः', सुदर्शन मिश्रस्य 'सुदर्शनानन्द चम्पूः' , गोपीनाथ दाशस्य 'श्रीदाश पुष्पाञ्जलिः', मदनमोहन करस्य 'ग्रहयाग पद्धतिः', त्रिविक्रम पतिनः 'गोपबन्धु स्मृतिः', जगन्नाथ रथस्य 'नागरिकमुद्बोधनम्', विषकंठ वाचस्पतिनः 'वाणीविलासः', कामाक्षी प्रसाद शर्मणः 'कामाक्षी स्तोत्र रत्नमाला', लडुकेश्वर शतपथिनः 'कालिदास दशकम्', गोपीनाथ रथस्य 'विधिविडम्बनम्', कृष्णचन्द्र आचार्यस्य 'सुकवि महिमा', गुणनिधि त्रिपाठिनः 'पुरुषोत्तम माहात्म्यम्', कुरामणि पाठिशर्मणः 'नियति' पत्रिकायां लिखित-श्लोकाः, गणेश्वर रथस्य 'लिंगराजायतनम्', आनन्द महापात्रस्य 'श्रीराधिका प्रपत्तिः', वासुदेव महापात्रस्य 'सावित्री परिणयम्', रमाकान्त मिश्रस्य 'महात्मागान्धीः', हरेकृष्ण शतपथिनः 'कविशतकम्', 'गंगाजल दूषितम्', वनमालि-विश्वालस्य 'ऋतुपर्णा', 'जिजिविषा', 'विवेकलहरी', 'व्यथा', 'दारुब्रह्म', 'प्रियतमा'-प्रमुखाः ग्रन्थाः, केशव चन्द्र दाशस्य 'प्रणय प्रदीपम्', 'हृदयेश्वरी', 'महातीर्थम्', 'अलका', 'ईशा', 'भिन्न पुलिनम्', 'प्रतिपत्', 'निकषा', 'ऋतम्', 'विसर्गः', 'शशिरेखा', 'शान्तिः', प्रमुखाश्च बहुग्रन्थाः, हरेकृष्ण मेहेरस्य बहव अनुवादित-ग्रन्थाः, प्रदीप्त नन्दस्य 'श्रीक्षेत्रसुधानिधिः', 'श्रीजगन्नाथ दर्शनम्', 'भक्तिनिर्झरिणी', 'शिवार्च्चन प्रदीपाः' ग्रन्थाः, दिगम्बर महापात्रस्य 'उत्कलोदयः', 'सुरेन्द्र चरित महाकाव्यम्', 'ऋतुचक्रम्', 'भवते रोचते यथा', 'रंगरुचिरम्', 'व्यस्तरागम्' ग्रन्थाः, वैकुण्ठ विहारिनन्दस्य 'शरणागति स्तोत्रम्' महामहोपाध्याय-पण्डित-गोविन्द चन्द्र मिश्रस्य 'श्रीसारला शतकं', 'वैजयन्ती शतकं', 'प्रसेन विजय चम्पूः', 'श्रीराम लीलामृतम्', 'वदनचन्द्र-प्रकाशिका' दयो ग्रन्थाः, प्रमोद चन्द्र मिश्रस्य 'उत्कलगौरवम्', 'अन्योक्ति पञ्चाशिका', 'मूर्खशतकं', 'व्योमयान शतकं', 'चन्द्रदूतम्', चान्यानि काव्यरत्नानि च सन्ति । उपर्युक्ताः संस्कृतज्ञाः उत्कलेषु शास्त्रिय-काव्य- संगीत- नाटक -अलंकार-गान्धर्व-एकांकिका-अभिनय-कला-संस्कृति-साहित्यादि-क्षेत्रेषु प्रशंसनीया भवन्ति।

वैदिकक्षेत्रे अथर्व वेदस्य 'पैपल्लाद शाखा' उत्कलेषु संगृहीता । भौम-सोमवंश-राजत्वसमये मुरारिकविना 'अनर्घ राघव'-नाटकं प्रणीतम्। आचार्य-शतानन्देन 'भास्वती' प्रकाशिता । तदतिरिक्तौ तेन 'शतानन्द रत्नमाला', 'शतानन्द संग्रहः'-नामकौ ग्रन्थौ विरचितौ । पुरुषोत्तमदेवस्य राजनि वैष्णवधर्मो विस्तारितः । अस्मिन् समये धर्म-प्रचार-क्षेत्रे श्रीधरस्वामी, रघुत्तम तीर्थः, आनन्दगिरिः, राय रामानन्द-प्रमुखाः उत्कलीयाः वरेण्या-वैष्णवाः स्व स्व कार्याणि संपादितवन्तः ।

तक्षशिलायाः प्रधानाचार्यो माध्यमिकवादि-बौद्धनेता नागार्जुनोऽपि उत्कलीयः इति ऐतिहासिका निरूपयन्ति । पुरीमण्डलमण्डितः आर्या सप्तशत्याः लेखको गोवर्धनाचार्यः प्रसिद्धः। तदतिरिक्ताः नीलाम्बर आचार्य-उदयनाचार्य-बलभद्रादयो विद्वांसः उत्कलजननीं कृतार्थीकृतवन्तः। धर्मशास्त्रक्षेत्रेषु गंगवंश-युगीयाः वाजपेयिनः अग्रगण्याः । तेषु भारद्वाजगोत्र-शम्भुकर वाजपेयी प्रसिद्धः । तत्कृतिषु 'अग्निहोत्र होमपद्धतिः', 'अग्निहोत्रहोमः', 'प्रायश्चित पद्धतिः', 'दर्श-पौर्णमासेष्टि पद्धतिः', 'दुर्बलकर्म पद्धतिः', 'निरुढ पशुयाग पद्धतिः', 'स्मार्त्तरत्नावली', प्रमुखाः ग्रन्थाः विश्व- प्रसिद्धाः । 'शम्भुकर पद्धतिः' अस्य महान् धर्मशास्त्रिय-ग्रन्थः । त्रयोदश-शताब्दीय- विद्याकर वाजपेयिना अष्टभागात्मको नित्याचार पद्धतिर्विनिर्मिता । अधुना एसिआटिक् सोसाइट् द्वारा प्रकाशिता च । विद्याकरस्य प्रियशिष्य-रामचन्द्र वाजपेयिना नैमिष्यारण्ये बहुकालं संन्यस्य बहुग्रन्थाः विरचिताः ।

महाराज-पुरुषोत्तम-देवेन 'अभिनव गीतगोविन्दम्', 'मुक्तिचिन्तामणिः', 'गोपालार्चनपद्धतिः', 'नाममालिका', 'आनन्दविलासः', 'दशग्रीव वध :', 'जानकी प्रमोदः', 'कुवलयाश्वचरितम्', 'अभिनव वेणीसंहारम्', 'दुर्गोत्सवः', 'भुवनेश्वरी पूजा', एवमन्ये ग्रन्थाः विरचिताः । विंशति-सर्गात्मकं 'दशग्रीव वधम्'-नाटकं कवीन्द्र-मार्कण्डेयस्य कृतिरिति केचन मन्यन्ते । तेन पुरुषोत्तमदेवस्य नाम्ना भणितम् ।

पञ्चदश-शतकस्य मुकुन्ददेवस्य सभापण्डितेन कृष्णदास-बडजेना-महापात्रेण 'गीतप्रकाशकः' ग्रन्थो विरचितः । पुरुषोत्तम-मिश्रेण 'नीलाद्रिनाथ-शतकम्', नैषधचरित टीका-प्रसूतं 'भागवत महाकाव्यम्' , 'रामचन्द्रोदय काव्यम्', संगीतनारायणादीनि बहुशास्त्राणि विरचितानि । अष्टादश -शताब्दि -मण्डित-पण्डित-कौण्डिन्य-गोत्रिय-रघुनाथ-दाशेन बहुग्रन्थाः संकलिताः । तेषु 'भट्टिकाव्य-टीका', 'साहित्य-भूषणम्', 'वृत्तावलिः', 'कालनिर्णयः', 'श्राद्धनिर्णयः', 'उत्पात तरंगिणी', 'न्याय रत्नावलिः', 'रघुवंश टीका', 'अमरकोशटीका', 'काव्यप्रकाश टीका', 'शिशुपालवधटीका', 'वनदुर्गा पूजा', 'बर्द्धमान प्रकाशः', 'कारक निर्णयः', 'वैद्य कल्पलता', 'सार सिद्धान्त संग्रहा' ख्याः व्याकरणग्रन्थाश्च प्रसिद्धाः वर्तन्ते । हरेकृष्णपुर शासन-निवासिना गदाधर-राजगुरुणा 'गदाधरपद्धतिः' संपादिता । अष्टादशाध्यायविशिष्टोऽयं ग्रन्थः संप्रति अष्टाध्यायविशिष्टतया उपलभ्यते ।

नाटकक्षेत्रे भट्टनारायणः श्रेष्ठनाटककारः । तेन 'वेणीसंहार'-नाटकं विलिखितम् । राज्ञः कपिलेश्वरस्य 'परशुराम विजयः', नारायणानन्दस्य 'श्रीरामचन्द्रानन्दम्', जीवदेव-पुत्रस्य द्वितीय जयदेवस्य 'पीयूष लहरी नाटिका', 'वैष्णवामृत नाटकम्', च प्रमुखानि सन्ति ।

अभिधान-क्षेत्रे पुरुषोत्तमदेवस्य 'त्रिकाण्ड शेषः', 'हारावली', मेदिनीकरस्य 'मेदिनी' कोशाः श्रेष्ठाः। व्याकरण-क्षेत्रे मार्कण्डेय मिश्रस्य 'प्राकृत सर्वस्वः', जुमरस्य 'जुमर व्याकरणम्', रामभद्रस्य 'सिद्धान्त चन्द्रिका', अनुभूति स्वरूपाचार्यस्य 'सारस्वत व्याकरणम्', 'प्रबोध चन्द्रिका' दीनि दृष्टिपथे विलसन्ति ।

तन्त्रग्रन्थेषु 'उड्डियान तन्त्रम्' 'उडभास्वर तन्त्रम्' 'उड्डिश' तन्त्राणि च उत्कलेषु विनिर्मितानि । अन्येषु तन्त्रग्रन्थेषु गोदावर मिश्रस्य 'यन्त्र चिन्तामणिः', 'शारदार्च्चन पद्धतिः', पुरुषोत्तमदेवस्य 'भुवनेश्वरी पल्लवः', 'प्राकृत चण्डी', विद्याधर बाजपेयिनः 'शक्ति प्रतिमा प्रतिष्ठा', वर्द्धन महापात्रस्य 'दुर्गोत्सव चन्द्रिका', वासुदेव रथस्य 'भुवनेश्वरी प्रकाशः', लक्ष्मेश्वर रथस्य 'ज्ञानावली' तन्त्राणि च स्मर्तव्यानि ।

दर्शनक्षेत्रेऽपि उत्कलीया धुरन्धरा आसन् । ज्ञानसिद्धेः कर्ता इन्द्रभूतिः, बौद्ध-दार्शनिको धर्मकीर्तिः, नागार्जुनादयश्च उत्कलीय- सन्तानाः आसन् । श्रीधरस्वामिनः 'गीता-भागवत टीके' प्रसिद्धे । वालेश्वर-रेमुणा-भूमिगौरवस्य बलदेव विद्याभूषणस्य ब्रह्मसूत्रोपरि 'गोविन्दभाष्यम्' प्रसिद्धम् । एतदतिरिक्तं तेन 'ऐश्वर्यकादम्बिनी', 'प्रमेय रत्नावली', 'लघुभागवतामृतम्', 'काव्यकौस्तुभः', 'विष्णुसहस्रनाम भाष्यम्', 'सिद्धान्तरत्नम्', 'भगवद्गीताभाष्यम्', वेदान्त स्यमन्तकादयः बहुग्रन्थाः विरचिताः । जगन्नाथ रथस्य 'जैनदर्शनम्', लोकनाथ शास्त्रिणः 'सिद्धान्त मुक्तावली टीका', दामोदर महापात्रस्य 'सर्वदर्शन कौमुदी', 'योगतत्त्व वारिधिः', प्रो० नीलकंठ-पतेः 'सामान्य-दर्शनम्', 'दर्शनेषु तत्त्वचतुष्टयम्', शिवार्च्चनपद्धत्यादयो ग्रन्था अनुपमाः । प्रो० प्यारीमोहन पट्टनायकस्य 'न्याय परिभाषा', 'न्यायसूत्र वात्स्यायन भाष्यस्य रैखिक प्रतिनिरूपणम्', 'वैशेषिकसूत्रोपस्कारस्य रैखिक प्रतिनिरूपणम्', 'मीमांसा परिभाषायाः रैखिक प्रतिनिरूपणम्', 'सांख्यकारिकायाः रैखिक प्रतिनिरूपणम्', 'वेदान्तसारस्य रैखिक प्रतिनिरूपणम्' इत्यादयो ग्रन्थाः प्रसिद्धाः रेखाचित्रपरकाः सन्ति । प्रो० प्रलय कुमार नन्दस्य 'योगलक्षण-विमर्शः', 'अक्षपादीय-कणादीय-दर्शनयोः जातिस्वरूपविमर्शः' इति द्वौ ग्रन्थौ प्रसिद्धौ ।

गवेषणाक्षेत्रे डः सत्यनारायण राजगुरुः, केदार नाथ महापात्रः, ऐतिहासिको विनायक मिश्रः, पण्डित नीलकंठ दाशः, कृष्णचन्द्र राजगुरुः, अध्यापक-भगवान-पण्डादयः उत्कलीय-विद्वांसः अग्रगण्याः राजन्ते । केचन ऐतिहासिकाः कालिदास-दिङ्नागौ, उत्कलीयौ इति समामनन्ति, तन्मृग्यम् । अन्ततो गत्वा संस्कृतं प्रति उत्कलीयानां अवदानं चिरस्मरणीयं न विस्मरणीयमित्युक्त्वा लेखं समापयामि । अलमतिविस्तरेण । जयतु संस्कृतम् । जयतु उत्कलम् । जयतु भारतम् ।

**सहायकग्रन्थाः**


1-A History of sanaskrit literatur.-macdonell 1899
2- History of sanaskrit literature.-Dr. S N Dasgupta & D S.K De 1941
3- The literature of Orissa vol-2 W W Hunter
4-Descriptive cataloguas of Sanskrit manuscripts in the collection of the Asiatic Society of Bengal.
5- Bihar & Orissa research society, Odisha Acedemy.
6-Inscription of Orissa. –Vol-1,2&3 Prof-S N Rajguru
7-govardhan acharya & udayana acharya-Kedarnath mohapatra O. H.P. J. Vol-7
8-kabi udayanacharya ,Jhankar 3rd yeay 6th vol
9-ओडिआ साहित्य कु उत्कलीय संस्कृतिर दान- केदारनाथ महापात्र ,ओडिआ साहित्य एकादेमी भुवनेश्वर, 1982
10. The contribution of utkal to Sanskrit litlature- Dr. K.B.Tripathy
11-संस्कृत साहित्यर इतिहास- डः गोपीनाथ महापात्रः
12-ओडिशारे संस्कृत चर्च्चार परंपरा- ओडिशा साहित्य एकाडेमी-1982

## डॉ. यिग्ना सुब्रमण्यनः ( मणि ) दुर्लभं गौरवं प्राप्तवान्

न्यूयॉर्कः हिन्दूअमेरिकामन्दिरस्य सांस्कृतिककेन्द्रस्य (HATCC), श्रृंगेरी विद्याभारतीसंस्थानस्य च (SVBF) अध्यक्षः डॉ. यिग्ना सुब्रमण्यनः (मणि) दुर्लभं गौरवं प्राप्तवान्। डॉ. मणिः भारतस्य महानतमपीठेषु एकात्, श्रृंगेरीशारदापीठस्य, जगद्गुरुशंकराचार्य- श्रीश्रीभारतीतीर्थमहास्वामितः अमेरिकायाः मॉर्गनविले इत्यत्र नवरात्रिसमारोहावसरे धर्मात्मनः उपाधिं प्राप्तवान् । अस्मिन् अवसरे वदन् श्रृंगेरीपीठस्य सीईओ वीआर गौरी शंकरः अवोचत् यत् गतेषु 1200 वर्षेषु इतिहासे प्रथमवारं जातं यत् कस्मैचित् प्रवासिने भारतीयाय एतादृशसम्मानं प्राप्तम्। तेनोक्तं यत् डॉ. मणिः स्वीये जीवनकाले एतत्सम्मानप्राप्ता एकमात्रम् एनआरआई आसीत्। तेनोक्तं स। एतस्य सम्मानस्य योग्यः। शारदापीठस्य आशीर्वादः तस्योपरि सदा वर्तताम्। तेनोक्तं यत् डॉ. मणिः श्रृंगेरीशारदापीठस्य 1200 वर्षाणाम् इतिहासे इमाम् उपाधिं प्राप्तृरूपेण तृतीयजनः वर्तते। डॉ मणिः भक्तानां सहयोगेन अमेरिकायाः न्यू जर्सीस्थले हिंदू-अमेरिकीमन्दिरस्य सांस्कृतिक केन्द्रस्य , श्री गुरुवायुरप्पन मन्दिरं च निर्मितवान् । एतेषु मन्दिरेषु पुष्पाणां पादपाः, भक्तेभ्यः विशालवरदानं, स्वामिगोशालानां कृते द्वादशभवनानि च विद्यन्ते सरस्वतीविद्यालयः आगामिसन्तत्यै संस्कृतिं परम्परां च प्रदातुं वर्तते। डॉ. मणिः न केवलम् अमेरिकायाम् अपितु संसारस्य अन्येषु देशेषु अपि सनातनधर्मम् अग्रे को आगे वर्धयितुं धार्मिककार्यक्रमं सञ्चालति। शृंगेरीपीठस्य शाखाः अमेरिकायां कनाडायां च स्थापितवान्। भक्तस्य कृते वेदस्य भगवद्गीतायाश्च सन्देशं दातुं वैदिकगोष्ठ्यः आयोजिताः। स्वामी अभाषत यत् अल्पे वयसि अनेकधार्मिककार्यक्रमाणां सञ्चालकः प्रियाय शिष्याय डॉ. मणये दुर्लभं सम्मानं प्राप्तम्। भारतीतीर्थानन्दस्वामी उक्तवान् यत्तत्पार्श्वे सम्मानम् अर्जयितुं सर्वाः योग्यताः वर्तन्ते । तस्योपरि शारदा चन्द्रमौलीश्वरस्वामिनः आशीर्वादः सदैव वर्तताम्।

## ओलम्पिकक्रीडातः पदकानि आनीयेरन्, स्वयन्निर्मेया उत्तरप्रदेशस्य क्रीडानीतिः - मुख्यमन्त्री योगी



लखनऊ। मुख्यमन्त्रिणा योगिना आदित्यनाथेन प्रदेशे क्रीडासुविधानां विस्ताराय क्रीडकैः एथलीटजनैः परामर्शं दातुम् आह्वानं कृतम् । मुख्यमन्त्रिणा उक्तं यत् उत्तरप्रदेशे एशियनक्रीडा, राष्ट्रमण्डलक्रीडा ओलम्पिकक्रीडा सदृश प्रतिस्पर्धानां सिद्धतायै क्रीडकेभ्यः याः अपि सुविधाः स्वीकरणीयाः, ताः दास्यन्ते । अस्मिन् पर्याय क्रीडकाः एव क्रीडाविभागेन सह मिलित्वा नीतिः सज्जीकरिष्यन्ति।

टोक्योदेशे ओलम्पिकक्रीडायां प्रतिभागं कुर्वद्भिः उत्तरप्रदेशस्य निवासिभिः सर्वैः क्रीडकैः/एथलीटजनैः बुधवासरे संवादं कुर्वता मुख्यमन्त्रिणा योगिना सर्वेभ्यः शुभकामनाः दत्ताः अपि च विश्वस्तं यत् अस्मिन् पर्याय टोक्योदेशतः उत्तमा वार्ता आगमिष्यति । शुभकामनायै मुख्यमन्त्रिणः आभारं व्यक्तीकुर्वता क्रीडकैः स्वकीयं सर्वश्रेष्ठप्रदर्शनं करणाय प्रतिबद्धता अभिव्यक्ता ।

आभासिमाध्यमेन जाते अस्मिन् संवादे मुख्यमन्त्रिणा योगिना एकैकशः सर्वाभ्यः दशभ्यः प्रतिभागिभ्यः कोरोना महामार्याः विपरीत परिस्थितिष्वपि सञ्चाल्यमानायाः ओलंपिकक्रीडायाः सज्जाविषये सूचना प्राप्ता। तेषाम् उत्साहश्च वर्धितः । तत्र प्रदेशसर्वकारं प्रति अपेक्षाविषये क्रीडकेषु पृष्टेषु सत्सु तैः ओलंपिकसदृशवैश्विक स्पर्धानां सज्जायै उत्तमप्रबन्धस्य आवश्यकता उपस्थापिता। मुख्यमन्त्रिणा अपि सर्वे आश्वस्तीकृत्य उक्ताः यत् प्रधानमन्त्रिणः नरेन्द्र मोदिनः मार्गदर्शने केन्द्रराज्यसर्वकारयोः क्रीडां क्रीडकांश्च प्रोत्साहयितुं निरन्तरं प्रयतेते। ग्रामेषु क्रीडाम् उद्देश्य वातावरणं निर्मीयेत। तदर्थं प्रदेशस्य सर्वेषु ग्रामेषु क्रीडाक्षेत्रं, व्यायामशाला च निर्मास्यते। युवमंगलदलगठनं भवति तु युवप्रतिभायै अपि सहयोगसामग्री उपलप्स्यते। मेरठे क्रीडाविश्वविद्यालयः स्थाप्यते। एषः विश्वविद्यालयः प्रदेशे क्रीडाक्रीडकयोः विकासाय एकं वृहत्केन्द्ररूपेण प्रस्फुटितं भविष्यति। मुख्यमन्त्रिणा उक्तं यत् सर्वे प्रतिभागिनः ओलम्पिकक्रीडातः पदकं प्राप्य आगच्छेयुः, पुनः प्रदेशे वैश्विकमानकेषु क्रीडासुविधायाः विकासाय स्वकीयां कार्ययोजनां वदेयुः । अनेन परामर्शाधारेण सर्वकारद्वारा सर्वे अपेक्षिताः प्रबन्धाः करिष्यन्ते । संवादकाले उपस्थितेभ्यः क्रीडकेभ्यः वर्धापनानि ददता मुख्यमन्त्रिणा उक्तं यत् बहुशीघ्रं सर्वेषां क्रीडकानां परिजनेभ्यः लखनऊजनपदे आमन्त्र्य सम्मानं प्रदास्यते।

मुख्यमन्त्रिणा उक्तं यत् राज्यसर्वकारेण ओलम्पकक्रीडाकाले एकलप्रतिस्पर्धानां स्वर्णपदकविजेतृभ्यः षष्टिकोटिः, रजतपदकविजेतृभ्यः चतुःकोटिः, कांस्यपदकविजेतृभ्यः द्विकोटिः रुप्यकाणां सम्मानराशिः प्रदास्यते। अनेन प्रकारेण समूहक्रीडासु स्वर्णपदके त्रिकोटिः, रजतपदके द्विकोटिः, कांस्यपदकाय एककोटिः रुप्यकाणां धनराश्या सम्मानयिष्यन्ते । अपि च ओलम्पिकक्रीडायां प्रतिभागं कुर्वद्भ्यः उत्तरप्रदेशनिवासिभ्यः सर्वेभ्यः क्रीडकेभ्यः दशखद्रदशलक्षं रचप्यकाणि अपि प्रदास्यन्ते।

मेराजः मुख्यमन्त्रिणा उक्तः, ओलम्पिकक्रीडातः प्रति आगन्तव्यं, पुनः निर्मातव्यं विश्वस्तरीयः आक्षेपणक्षेत्रम्

मुख्यमन्त्रिणा संवादकार्यक्रमे लक्ष्यसाधकः मेराज अहमद खानेन प्रदेशे शूटिंग रेंज इत्यस्य स्थापनायाः आवश्यकता उक्ता, यस्मिन् मुख्यमन्त्रिणा उक्तं यत् वाराणसी, लखनऊ चेत्यनयोः जनपदयोः शूटिंग रेंज इत्यस्य स्थापना भवति । सः ओलम्पिकक्रीडातः प्रत्यागच्छेत् तथा च परियोजनां दृष्ट्वा तां अन्ता राष्ट्रियमानकानुरुपं सिद्धं कर्तुं सहायतां कुर्यात् । अनेन प्रकारेण, एथलीटक्रीडिका प्रियंकागोस्वामिना कृत्रिमक्षेत्रस्य विकासस्य आवश्यकता कथने मुख्यमन्त्रिणा शीघ्रमेव एषः आभावः दूरीकर्तुम् आश्वासनं दत्तम् । संवादकाले प्रियंकागोस्वामी (एथलेटिक्स), अन्नूरानी (एथलेटिक्स), सीमापुनिया (एथलेटिक्स), वन्दनाकटारिया (हॉकी), सौरभचौधरी (शूटिंग), मेराज अहमद खानः (शूटिंग), अरविन्दसिंहः (रोइंग), सतीशकुमारः (बॉक्सिंग), ललितकुमार उपाध्यायः (हॉकी), शिवपालसिंहः (एथलेटिक्स) अपि च तेषां परिजानानां उपस्थितिः अभवत। इतः पूर्वं, क्रीडायुवाकल्याणराज्यमन्त्रिणा (स्वतन्त्रप्रभारः) उपेन्द्रतिवारिणा क्रीडकेभ्यः शुभकामनाः ददता तेषां सर्वविधावश्यकता पूर्णं कर्तुं विश्वस्तम् ।

## प्राथमिकस्तरे संस्कृतं समानेतुं चर्चा विहिता

लखनऊ। संस्कृतशिक्षां प्राथमिकस्तरं यावत् प्रापयितुं प्राथमिकशिक्षानिदेशकेन डॉ सर्वेन्द्र विक्रम बहादुरेण सह चर्चाम् अकरोत् उत्तरप्रदेशसंस्कृतसंस्थानस्य (लखनऊ) अध्यक्षः डॉ



वाचस्पति मिश्रः, तत्र अवसरेस्मिन् शिक्षकाणां प्रशिक्षणार्थं राज्यशैक्षिकानुसंधानप्रशिक्षणपरिषदा सह संस्कृतशिक्षणप्रशिक्षणविषये अपि चर्चा जाता। प्राथमिकस्तरे संस्कृतं समुन्नेतुं संस्थानस्य राज्यशैक्षिकानुसंधानप्रशिक्षणपरिदश्च संयुक्ततत्वावधाने एतावता जिल्लाशिक्षाप्रशिक्षणकेन्द्राणां माध्यमेन वारद्वयम् अखिले प्रदेशे प्रशिक्षणं जातमस्ति। तत्र अवसरेस्मिन् डॉ विनोद कुमार मिश्रः , उपनिरीक्षिका (संस्कृत पाठशाला) डॉ रेनू वर्मा, प्राचार्यः अरविन्द कुमार तिवारी च समुपस्थिताः। शिष्टाचारपूर्णेस्मिन् संगमे अधिगमशैक्षिकशोधपत्रिका निदेशकमहोदयेन संस्थानाध्यक्षाय प्रदत्ता।

## जेएसमहाविद्यालये ( उनौला ) दलद्वारा विहितं सूच्यौषधीकरणं, मुख्यचिकित्साधिकारी प्राप्तः निरीक्षणार्थम्

### महाविद्यालयप्रबंधनस्य जागरुकतया युक्तं जनबाहुल्यम्

बदायूं। तत्र सामुदायिकस्वास्थ्यकेंद्रस्य जगतः स्वास्थ्यकर्मिणां दलेन कोरोनासूच्यौषधीकरणस्य केन्द्रं आयोजितम् । तत्र अवसरे महाविद्यालयस्य छात्रच्छात्र्यः सहभागमकुर्वन्। आधिक्येन



सूच्यौषधीकरणाय प्रेरणा प्रदत्ता मुख्यचिकित्साधिकारिणा निरीक्षणं कृतम्। तत्र सुमनलता सक्सेना, अंजली सक्सेना पूजा माथुरश्च सूच्यौषधीकरणं कृतवन्तः ।केन्द्रे प्रवक्तृभिः छात्रैश्च सूच्यौषधीकरणं प्रयुक्तम्। समीपस्थग्रामेषु झंडपुरम्, उनौला, जखेली, इस्लामगंज खरखोली च गत्त्वा कोरोनासूच्यौषधीकरणाय जनजागरणं कृतम्। यस्य परिणामस्वरूपेण ग्रामीणक्षेत्रस्य जनैः सह महिलासु कोरोनासूच्यौषधीकरणं प्रति उत्साहः दृष्टः । अवसरे मुख्यचिकित्साधिकारी डॉ विक्रम सिंह पुंडीरः, एसीएमओ. डॉ पवन कुमारश्च निरीक्षणं कृत्वा दलस्य उत्साहवर्धनं कृतम्। महाविद्यालयस्य प्राचार्याय प्रवक्तृभ्यश्च आभारः व्यक्तीकृतः । अवसरेस्मिन् महाविद्यालयस्य प्रबन्धकः श्रीमान् नरेन्द्र यादवः, निदेशकः श्रीमान् विकास यादवः, प्राचार्यः डॉ अजीत शंखधारः, प्रवक्ता डॉ कृष्ण गोपालः, संजीव कुमार सिंहः, राहुल कुमारः, छवी राम यादवः, अनिल कश्यपः, रत्ना सक्सेना, सना, प्रिया पालः, कु. साक्षी गुप्ता, सर्वेश यादवः चेत्यादिभिः सह छात्राः उपस्थिताः आसन् ।

## मुख्यमंत्रिण श्रीजयरामठाकुर-वर्येण श्रीअनुरागठाकुरेण च कृता संगोष्ठी॥



(संस्कृत-संवादः)

हिमाचलप्रदेशः। मुख्यमंत्री श्रीजयरामठाकुर-वर्येण गतदिवसे देहल्यां केन्द्रीय सूचनाप्रसारण एवं युवासेवाक्रीडामन्त्रिणा श्रीअनुरागठाकुरेण सह मेलनं कृतं तथा च केन्द्रीयमंत्रीपदस्य शुभकामनाः प्रदत्ताः। उभयोः मध्ये प्रदेशे क्रीडागतिविधिनां उन्नयनार्थं अपि च आभ्यान्तरिक-मञ्च(इन्डोरस्टेडियम) निर्मातुमपि चर्चा जाता।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारी, डॉ. राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलः- डॉ.सुन्दरनारायणझा, डॉ. सुरेन्द्रमहतो, डॉ. सन्नीकुमार, डॉ. संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।